(सू) आम्नायस्य क्रियार्थत्वादानर्थक्यतदर्थानां तस्मादनित्यमुच्यते । वायव्यं श्वेतमालभेत भूतिकामो वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेनभागधेयेनोपधावति स एवैनं भूतिं गमयति भवत्येवातिक्षिप्रा देवतेत्याहु: सैनमीश्वरा प्रदह इत्येतमेव सन्तं वायवे नियुत्वत आलभेतेत्यादि श्रूयते । तत्र वायव्यं श्वेतमित्याद्यर्थवादानां पूर्वपादान्त्याधिकरणेन वेदावयवत्वाद्विध्युद्देशवत् प्रसक्तं प्रामाण्यमाक्षिप्य समाधीयते ।

Colophon :

इति श्रीभरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्धनिर्माणधुरंधरश्रीमदप्पयदीक्षितसोदर्यश्रीमदय्यादीक्षितपौत्रेणालंकारतिलकाद्यनेकप्रबन्धनिर्मातुरप्पय्यदीक्षितस्य पुत्रेणाप्पयदीक्षितेन विरचितायां तन्त्रसिद्धान्तदीपिकायां प्रथमस्याध्यायस्य द्वितीय: पाद: ।

End :

पशावनालम्भात् । अग्नीषोमीयं पशुमालभेतेति प्रकृत्य श्रुतम् । शत्रु . . . . . विध्यतिलोहितं निरस्यतीति, तथा हृदयस्याग्रेऽवद्यतीत्यादि च । तत्र पशोर्हृदयादि शकृदादि च प्रयोजकमुत शकृदादि न प्रयोजकमिति विशये द्वयोरपि प्राण्यवयवत्वात् अवयव्यपेक्षायां संनिधानाविशेषात् पशुरुभाभ्यां संबध्यते प्रयुज्यते चेति प्राप्ते—

162 30. A. 16.

तन्त्रसिद्धान्तदीपिका—अप्पयदीक्षितकृता

Palm-leaf. 56 Foll. $14\frac{3}{4} \times 1\frac{1}{8}$ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

The leaves beer the serial numbers 1 to 72; but the leaves No. 34 to 49 are wanting.

Begins in the 2nd pāda of the 1st adhyāya and breaks off in the last sūtra of the 4th pāda of the same adhyāya. Then begins towards the middle of the 2nd pāda of the 2nd adhyāya and breaks off in the 3rd pāda of the same adhyāya.

Colophon of the 2nd pāda of the 1st adhyāya states that the author's mother was called Bhūmidevī.

इति श्रीमद्भरद्वाजकुलजलधिकौस्तुभश्रीकण्ठमतप्रतिष्ठापनाचार्यचतुरधिकशतप्रबन्धनिर्माणधुरन्धरमहाव्रतयाजिश्रीमदप्पयदीक्षितसोदर्याय्यादीक्षितपौत्रेणालंकारतिलकाद्यनेकप्रबन्धनिर्मातुरप्पयदीक्षितपुत्रेण भूमिदेवीनन्दनेन अप्पयदीक्षितेन विरचितायां तन्त्रसिद्धान्तदीपिकायां प्रथमस्याध्यायस्य द्वितीय: पाद: ।

163 10. E. 36.

भाट्टदीपिका — खण्डदेवकृता

Paper. 169 Foll. $9\frac{3}{4} \times 4\frac{1}{2}$ inches. 11 lines in a page. Devanāgarī script. Old. Good. Good writing.

The leaves are arranged in three groups with separate paginations. The first group contains leaves 29; the second 26 and the third 114.

This is the famous work elucidating the various adhikaraṇas of Pūrvamīmāṁsā. He closely follows Kumārila's view and appropriately calls the work Bhāṭṭadīpikā. The author Khaṇḍadeva was the son of Rudradeva. He is said to have been a younger contemporay of Appayadīkṣita I who has been referred to in the Mīmāṁsākaustubha by Khaṇḍadeva. Jagannāthapaṇḍita refers to his father Parubhaṭṭa as the disciple of Khaṇḍadeva in the study of Mīmāṁsā. The famous S'aṁbhubhaṭṭa, the commentator on the Bhaṭṭadīpikā by the name Prabhāvalī, was another disciple of Khaṇḍadeva. He states, in the Prabhāvalī at the end of the 12th chapter, that Khaṇḍadeva took Saṁnyāsa life in his old age and died at Kās'ī in the year Saṁ 1722=1665 A.D. Khaṇḍadeva is said to have been called S'rīdharendra in his Saṁnyāsās'rama. He was the founder of the modern school (नवीनमत) in the Mīmāṁsā philosophy. He has written two more works in Mīmāṁsā *namely* Bhāṭṭarahasya and Bhāṭṭakaustubha also called Mīmāṁsākustubha. The work has been printed and published by the Royal Asiatic Society of Bengal and the Govt. Oriental Library, Mysore, in 4 volumes.

Contains the adhyāyas 1 to 3.

Beginning :

दीक्षाङ्गो मन्त्रराशिस्त्रिसवनपुरभू: षोडशर्त्विक्छदाढ्य
इष्टेष्टिद्वयेकगर्भस्त्रिविधपशुभृदाम्नायपाठयेकसाध्य: ।
षोडश्या यन्त्रितो द्वादशशतकगवीदक्षिणाढ्यस्त्रयीयुक्
चत्वारिंशन्मिताग्निर्दिशतु सदमृतं चक्रराट् सोमयाग:॥
पादै: षट्सप्तत्या त्रयोदशशतीमतीतमधिकरणै: ।
अध्यायै: षोडशभिर्जयति मुनेर्जैमिने: शास्त्रम् ॥
विश्वेश्वरं नमस्कृत्य खण्डदेव: सतां मुदे ।
तनुते तत्प्रसादेन संक्षिप्तां भाट्टदीपिकाम् ॥
इत: प्राञ्चोऽखिला ग्रन्था न्यूनतादोषदूषिता: ।
इयमेकैव पूर्णाभूच्छास्त्रेऽस्मिन् भाट्टचन्द्रिका ॥

इह खलु निखिलपुमर्थानर्थसाधनौ धर्माधर्मौ साङ्गोपाङ्गवेदाध्ययनैकसमधिगम्यौ । तच्च विचारमन्तरेण न भाव्यायालमिति तत्प्रदर्शनाय परमकारुणिको भगवान् जैमिनिराचार्य: सकलविद्योपकारिधर्ममीमांसाम् अथातो धर्मजिज्ञासेत्यारभ्य विद्यते वान्यकालत्वात् यथा याज्यासंप्रैषो यथा याज्यासंप्रैष इत्यन्तै: सूत्रै: बह्वधिकरणगर्भितां षोडशलक्षणीमन्तर्हितां विद्यां प्रकटीचकार ।

End :

दृष्टश्च पुरोडाशानलंकुर्वित्यादौ पुरोडाशशब्द: सवनीयसंबन्धिहवि:पर इति तस्य सवनीययागलक्षकत्वं सुकरमेव । तदेवं श्रुत्यादिषट्प्रमाणकमङ्गत्वं निरूपितम् । अत: परं प्रयोज्यत्वं निरूपयति ।

Colophon :

इति श्रीखण्डदेवकृतौ भाट्टदीपिकायां तृतीयस्याष्टम: पाद: ।

164 22. L. 27.

भाट्टदीपिका — खण्डदेवकृता

Palm-leaf. 49 Foll. $15\frac{3}{4} \times 1\frac{3}{8}$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the pādas 1 to 3 (incomplete) in the 3rd adhyāya.

The former owner of the MS. was Nāvalpākkam Des'ikācārya.

165 23. F. 1.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 207 Foll. 14 × $1\frac{1}{2}$ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Wants the beginning in the first pāda of the 4th adhyāya and breaks of in the 4th pāda of the 9th adhyāya.

166 23. F. 20.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 113 Foll. $20\frac{1}{2}$ × 2 inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Begins in the first pāda of the 4th adhyāya and breaks off in the 3rd pāda of the 9th adhyāya.

167 23. G. 15.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 64 Foll. $17\frac{1}{2}$ × $1\frac{1}{4}$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the 6th adhyāya only complete.

168 25. M. 9.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 200 Foll. 16 × $1\frac{1}{2}$ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Contains the adhyāyas 7 to 11.

169 25. N. 5.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 59 Foll. $18\frac{3}{4}$ × $1\frac{1}{2}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Contains the adhyāyas 11 and 12.

Date of copying :

आङ्गिरसनामसंवत्सरकार्तिकामासि कृष्णैकादश्यामिदं पुस्तकं लिखितम् ।

170 25. N. 7.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 77 Foll. $15\frac{1}{4}$ × $1\frac{1}{4}$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Contains the adhyāya 3 (incomplete).

171 26. D. 4.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 211 Foll. $16\frac{1}{2}$ × $1\frac{1}{4}$ inches. 8 lines in a page. Telugu script. Old. Injured. Clear writing.

Contains the adhyāyas 4, 9 and 10.

172 26. K. 5.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 235 Foll. $16\frac{3}{4}$ × $1\frac{1}{2}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Foll. are numbered 126 to 230 and 1 to 130.

Begins in the 4th pāda of the 3rd adhyāya and goes up to the end of the 6th adhyāya.

The last 4 leaves read a few lines of the 1st pāda of the 1st adhyāya.

Three fly-leaves added at the beginning contain some sūtras of the Āpastamba-S'rautasūtra.

173 26. K. 24.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 104 Foll. 15 × $1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Much injured. Clear writing.

Contains fragments of the adhyāyas 8 and 9.

174 26. L. 5.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 144 Foll. 15 × $1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Much injured. Good writing.

Contains the Adhyāyas 10 to 12.

175 26. L. 12.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 50 Foll. 19 × $1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Injured. Clear writing.

Bamboo planks are added to both sides.

Begins in the 2nd pāda of the 1st adhyāya and goes on up to the end of the 2nd adhyāya.

176 26. N. 5.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 31 Foll. $15\frac{1}{2}$ × $1\frac{1}{2}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the 1st adhyāya incomplete.

177 26. O. 2.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 50 Foll. $14\frac{3}{4}$ × $1\frac{5}{8}$ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Contains the 6th adhyāya complete.

178 27. A. 19.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 141 Foll. $13\frac{1}{2}$ × 2 inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Contains the adhyāyas 9 and 10.

The last two additional leaves contain a few lines of a letter in verses written by one Cakravartyācārya to his friend.

179 27. A. 21.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 272 Foll. 15 × $1\frac{1}{2}$ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Wants beginning in the 5th pāda of

the 3rd adhyāya and breaks off in the 2nd pāda of the 10th adhyāya.

180 27. A. 22.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 247 Foll. 18½ × 1¼ inches. 8 lines in a page. Telugu script. Old. Injured. Clear writing.

Begins in the 2nd pāda of the 1st adhyāya and goes on up to the end of the 9th adhyāya.

181 27. A. 23.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 83 Foll. 14 × 1¼ inches. 8 lines in a page. Grantha script. Old. Much injured. Good writing.

Wants beginning in the 1st pāda of the 1st adhyāya and breaks off in the 2nd pāda of the 3rd adhyāya.

182 27. A. 24.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 115 Foll. 13½ × 1½ inches. 13 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Begins in the 2nd pāda of the 1st adhyāya and breaks off in the 1st pāda of the 5th adhyāya.

183 27. A. 25.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 131 Foll. 15¾ × 1½ inches. 7 lines in a page. Telugu scripts. Old. Injured. Illegible writing.

Fol. 21 is missing.

Begins in the 1st pāda of the 9th adhyāya and breaks off in the 3rd pāda of the 10th adhyāya.

184 27. B. 3.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 157 Foll. 15 × 1¼ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Fol. 86 is wrongly numbered as 85.

Contains the adhyāyas 9 to 12 complete.

185 27. B. 4.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 58 Foll. 17 × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Clear writing.

Contains the adhyāya 6 only.

The Foll. are numbered from 120 to 177.

186 27. B. 7.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 159 Foll. 14 × 1¼ inches. 8 lines in a page. Grantha script. Old. Much injured. Good writing.

Begins in the 6th adhyāya and breaks off in the 3rd pāda of the 9th adhyāya.

187 27. J. 25.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 234 Foll. (3-236). 17½ × 1⅝

inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Wants beginning in the 1st pāda of the 5th adhyāya and breaks off in the 8th adhyāya of the 10th adhyāya.

188 27. N. 35.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 32 Foll. 14½ × 1¼ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the 5th adhyāya breaking off in the 4th pāda.

189 33. G. 19.

भाट्टदीपिका—खण्डदेवकृता

Palm-leaf. 55 Foll. 15½ × 1½ inches. 10 lines in a page. Grantha script. Old. Injured. Good writing.

Contains fragments of the adhyāyas 4, 5, 6, 9 and 10.

190 8. K. 2.

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 1560 Foll. 8½ × 6¼ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 8 volumes with different paginations. Vols. 1 and 2 bear 1 to 788 pages. Vol. 3 bears 1 to 459. Vols. 4 to 7 bear 1 to 1485. Vol. 8 bears 1 to 385.

This is an authentic commentary on Khaṇḍadeva's Bhāṭṭadīpikā. The commentary is appropriately named as Prabhāvalī in consonance of the name of the text. The commentator S'aṁbhubhaṭṭa mentions himself as the son of Bālakṛṣṇabhaṭṭa and the direct disciple of Khaṇḍadeva. He also states that though his teacher instructed him not to write any commentary up to the Balābalādhikaraṇa (3—3—7) of the text as the students could understand this portion by a careful study of his Bhāṭṭakaustubha, yet he has written the commentary on that portion to elucidate the idea of those passages which are not easily understandable by average students. He criticizes the views of Pārthasārathimis'ra, Somes'varabhaṭṭa, Appayadīkṣita etc. At the end of the 12th chapter of this commentary S'ambhubhaṭṭa says that the commentary was completed in the year Saṁ. 1764 corresponding to 1708 A.D.

Contains the adhyāyas 1 to 4.

Beginning of the 1st adhyāya :

अज्ञानतिमिरध्वंसि सत्यज्ञानप्रकाशकम् ।
सर्वाभीष्टप्रदं नौमि श्रीरूपं सुन्दरं महः ॥
यो वेदशास्त्रार्णवपारदृश्वा
यज्ञादिकर्माचरणेऽतिदक्षः ।
सदाशिवाराधनशुद्धचित्त-
स्तं बालकृष्णं पितरं नमामि ॥
श्रीखण्डदेवं प्रणिपत्य सद्गुणं
मीमांसकस्वान्तसरोजभास्करम् ।
अत्यन्तसंक्षिप्तपदार्थतत्कृतौ
प्रभावलीटिप्पणमातनोम्यहम् ॥

यद्यप्यत्र गुरोः कृतावपि मयाप्युद्भाव्यते काचना-
संभूतिस्तदपि प्रचारचतुरे नैषा पुरोभागिता ।
किं तु क्ष्मातिलकाः कुशाग्रधिषणाः सिद्धान्तबद्धादरा
मद्वाक्यं परिहृत्य तत्कृतिमलंकुर्वन्त्विवयं मे मतिः ॥

अत्र च यद्यपि बलाबलाधिकरणसमाप्तिपर्यन्तं स्वकृतेन कौस्तुभग्रन्थेन व्याख्यातार्था भाट्टदीपिका भवतीत्यतस्तदन्तं विहाय टिप्पणं कर्तव्यमित्याज्ञा पूज्यपादानामासीदिति तदन्तग्रन्थटिप्पणं कर्तुं न युक्तं, तथापि तदसंगृहीतार्थानां मूलाक्षरारूढत्वज्ञापनाय लोकोपकाराय च कौस्तुभदर्शितमार्गेणैवादितष्टिप्पणमारभ्यते। तत्र व्याख्यास्यमानार्थवादाधिकरणे यदुपोद्घाततत्वेनावश्यापेक्षितं तत्किंचिदादौ निरूप्यते । तत्र तावत् पूर्वचरणे अथातो धर्मजिज्ञासेति शास्त्रारम्भसूत्रेण प्रमाणस्वरूपसाधनफलैः साभासैर्विचारयिष्यमाणः सकलो धर्माधर्मप्रमेयरूपः शास्त्रार्थः प्रतिज्ञातो महर्षिणा जैमिनिना ।

End of the 1st adhyāya :

आदिपदेन विनियोगप्रयोगविधिविषयत्वादिरूपान्तरस्यापि ग्रहः ।

गम्भीरार्थपदाध्याये यदकार्षं तु टिप्पणम् ।
तत्साधनं गुरुकृपा न तु मे बुद्धिवैभवम् ॥

Colophon :

इति श्रीमत्पूर्वोत्तरमीमांसापारावारीणधुरीणश्रीखण्डदेवान्तेवासिकविमण्डनशम्भुभट्टविरचितायां भाट्टदीपिकाप्रभावल्यां प्रथमस्य चतुर्थः पादः। समाप्तश्चायमध्यायः ।

Beginning of the 2nd adhyāya :

अज्ञानतिमिरध्वंसि etc.—इयं मे मतिः ।

भावार्थाः । यद्यप्याद्यसूत्रे धर्मस्वरूपजिज्ञासैव प्रथमतः प्रतिज्ञाता। तद्विवरणपरे को धर्मः किंलक्षणक इति भाष्येऽपि प्रमाणजिज्ञासातः प्राक् स्वरूपजिज्ञासैव प्रतिज्ञातेति तत्स्वरूपनिरूपणमेवादौ कर्तुमुचितं न प्रमाणनिरूपणं, तथापि मेयसिद्धेः प्रमाणाधीनत्वात् चोदनासूत्रे प्रमाणान्तर्भावेनैव स्वरूपोक्तेः कर्तुं योग्यामपि स्वरूपचिन्तामुपेक्ष्य प्रमाणचिन्ता पूर्वाध्याये कात्स्न्र्येन कृता ।

End of the 2nd adhyāya :

अतः परमिति । तेषामिति बहुवचनेनातः परमित्यनेन च सूचितोत्तराध्यायार्थनिरूपणं प्रत्येतदध्यायार्थनिरूपणस्य हेतुहेतुमद्भावरूपसंगतिरुत्तरत्र स्पष्टीभविष्यति ।

Colophon of the 2nd adhyāya is similar to that of the 1st adhyāya.

Beginning of the 3rd adhyāya :

अज्ञानतिमिरध्वंसि etc.— इयं मे मतिः ।

अथातः शेषलक्षणम् । यद्यप्यथशब्दस्यानन्तर्यं पूर्वप्रकृतापेक्षित्वमधिकारश्चेति त्रयोऽर्थाः, तथापि जिज्ञासासूत्रे शब्देन निर्दिष्टस्यैव पूर्वप्रकृतत्वनियमे सत्यध्ययनस्य पूर्वं शब्देन निर्दिष्टत्वाभावेन पूर्वप्रकृतापेक्षार्थत्वानुपपत्तेः जिज्ञासायाश्च प्रमाणपरतन्त्रत्वेन कृतिसाध्यत्वाभावात् शब्दव्यापारद्वाराधिकारासंभवात् विचारलक्षणायां प्रमाणाभावाच्च तदुभयार्थत्वमनङ्गीकृत्यानन्तर्यार्थत्वमेवाथशब्दस्य स्वीकृतम् ।

End of the 3rd adhyāya :

तदेवमिति । कः शेषः, केन हेतुना शेषः, कथं च विनियुज्यते। श्रुत्यादीनि च विनियोगे कारणानि। तेषां च बलवदबलवत्त्वादिप्रतिज्ञातार्थनिरूपणमेवंशब्दार्थः ।

Colophon of the 3rd adhyāya is similar to that of the 1st adhyāya.

Beginning of the 4th adhyāya :

(सू)—अथातः। अत्र प्रसिद्धे शेषशेषित्वे प्रयुक्तिरधुनोच्यत इति शास्त्रदीपिकाग्रन्थादन्तर्भावितणिजर्थविवक्षायां क्तिप्रत्ययान्तेन प्रयुक्तिशब्देन प्रयोजकत्वमध्यायार्थ इति भ्रमं व्यावर्तयन्नाह—प्रयोजकत्वनिरूपितं प्रयोज्यत्वमिहेति ।

End of the 4th adhyāya :

अतः प्रतिबन्धकाभावसत्त्वात् क्रमवाक्यप्रवृत्तिः पूर्वमुक्तेति भावः। अध्यायार्थमुपसंहरति—तदेवमिति ।

Colophon :

इति पूर्वोत्तरमीमांसापारावारीणधुरीणश्रीखण्डदेवशिष्यकविमण्डनशंभुभट्टकृतायां भाट्टदीपिकाप्रभावल्यां चतुर्थाध्यायस्य चतुर्थः पादः। समाप्तश्चाध्यायः ।

It is mentioned that this transcript was made from a MS. available in the Tanjore Maharaja's Library D. No. 2066.

191 8. I. 6.

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 58 Foll. 10 × 7¾ inches. 23 lines in a page. Grantha script. Old. Very much injured. Illegible writing.

Contains the 1st pāda of the 9th adhyāya incomplete.

Beginning :

अज्ञानतिमिरध्वंसि etc.— इयं मे मतिः ।

(सू)—यज्ञकर्म। प्रकृतावुपदिष्टेषु पदार्थेषु यथोपदेशमनुष्ठेयेषु वक्ष्यमाणान्यथाभावात्मकोहस्यातिदिष्टेष्वेव संभवात् अतिदेशनिरूपणोत्तरं तदारम्भो युक्त इति पूर्वोत्तराध्यायार्थनिरूपणयोर्हेतुहेतुमद्भावसंगतिं दर्शयति—तदेवं सिद्धेति ।

End :

कौस्तुभे व्यक्तमिति। ज्योतिष्टोमे तावत् तत्तद्विनियोगविध्यनुसारेण नानावेदस्वरे प्राप्ते दर्शपूर्णमासप्रकृतिकाङ्गविषये प्राकृतेन स्वरेण तस्य बाधः। तत्रापि यत् किंचित् प्राचीनमिति वचनेनाग्नीषोमीयपशुप्राग्भाविपदार्थाङ्गत्वेन.

The name of the scribe is mentioned as Venkaṭarāman.

192 9. G. 55.

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 126 Foll. 13 × 5½ inches. 8 lines in a page. Kannaḍa script. Old. Good. Good writing.

The last leaf is half-broken.

Contains the adhyāya 5 complete.

Beginning :

अज्ञानतिमिरध्वंसि etc.—इयं मे मतिः ।

(सू)—श्रुतिलक्षणमानुपूर्व्यं तत्प्रधानत्वात् । पूर्वाध्यायार्थोत्तराध्यायार्थयोरवसरसंगतिं हेतुहेतुमद्भावसंगतिं च दर्शयति—तदेवमिति ।

End :

तथा सोमविकारा दर्शपूर्णमासाभ्याम्। एष वावेति। एष वावेति वाक्येनाग्निष्टोमे प्राथम्यरूपाङ्गविधानाभावपूर्वकं तदुत्तरत्वमात्रविधानस्य पूर्वमुपपादितत्वादौपदेशिकेनाग्निष्टोमोत्तरत्वेनातिदेशिकाधानाव्यवहितोत्तरत्वस्य बाधादित्यर्थः । अध्यायार्थमुपसंहरति—इति सिद्धमिति ।

Colophon :

इति समाप्तमष्टममधिकरणम् ।

इति श्रीमत्पूर्वोत्तरमीमांसापारावारपारीणधुरीणश्रीखण्डदेवान्तेवासिकविमण्डनशंभुभट्टविरचितायां भाट्टदीपिकाप्रभावल्यां पञ्चमस्याध्यायस्य चतुर्थः पादः। समाप्तश्चायं पञ्चमोऽध्यायः।

Date of copying :

शार्वरिसंवत्सरफाल्गुनकृष्णत्रयोदश्यामेतद्ग्रन्थ - लेखनमवसन्नम्।

नेत्रबिन्दुनभःपञ्चमिलिते कलिवत्सरे।
व्यतीते लिखितेनैतद्ग्रन्थेन प्रीयतां हरिः॥

Kali year 5002.

193 9. G. 56.

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 77 Foll. 13 × 5½ inches. 8 lines in a page. Kannaḍa script. Old. Good. Good writing.

Contains the adhyāya 7 complete.

Beginning :

अज्ञानतिमिरध्वंसि + इयं मे मतिः।

(सू)—श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावः स्यात्। अत्र भाष्यकारेण पूर्वेणाध्यायषट्केण प्रत्यक्षविहितधर्माणां कर्मणां दर्शपूर्णमासादीनामितिकर्तव्यता विचारिता। उत्तरेणेदानीमविहितेतिकर्तव्यताकेष्वैन्द्राग्नादिषु चिन्तयितुमिष्यत इत्येवं षट्कक्रमसंगतिप्रदर्शनार्थमुक्तमापाततस्तावदयुक्तम्।

End :

ज्योतिष्टोमे द्वादशाहेनेति। वारुणमन्तत इत्यनारभ्याधीतवचनस्थमन्ततःपदं व्याचष्टे—अन्तत एकादशेऽहनीति।

Colophon :

इत्यष्टममधिकरणम्।

इति श्रीमत्पूर्वोत्तरमीमांसा + सप्तमस्याध्यायस्य चतुर्थः पादः। समाप्तश्चायं सप्तमोऽध्यायः।

The scribe adds :

ओं नमो भगवते मीमांसाद्वयगुरवे रामानुजार्याय।

194 9. G. 57.

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 26 Foll. 13 × 5½ inches. 8 lines in a page. Kannaḍa script. Old. Good. Good writing.

Contains the adhyāya 8 complete.

Beginning :

अज्ञानतिमिरध्वंसि + इयं मे मतिः।

(सू)—अथ विशेषलक्षणम्। पूर्वोत्तराध्यायार्थयोः परस्परसाकाङ्क्षत्वं दर्शयन् पूर्वाध्यायप्रतिपादितातिदेशसामान्यस्य यद्यपि न विशेषसापेक्षत्वम्। प्रत्यक्षवचननामातिदेशयोः पूर्वं निरूपितयोर्विशेषविषयत्वादेव संभवति तथापि चोदनालिङ्गातिदेशस्य पूर्वमुपपादितस्य विशेषसाकाङ्क्षत्वात् पूर्वाध्यायोत्तरं तन्निरूपणं नासंगतमित्यभिप्रेत्याह—तदेवमिति।

End :

तथापि वषट्कारस्य याज्यावाक्येन सोमयागाद्यङ्गत्वात् दर्विहोमेषूपदिष्टमन्त्राम्नानेनातिदेशप्राप्तयाज्याभावे सति द्वाराभावात् सोमयागातिदेशेनापि प्राप्त्यभावात् सिद्धः परिशेष इति न स्वाहाकाराप्राप्तिरित्याशय इति।

Colophon :

इति द्वितीयमधिकरणम्।

इति श्रीमत्पूर्वोत्तरमीमांसा + अष्टमस्याध्यायस्य चतुर्थः पादः समाप्तः।

The scribe adds :

ओं नमो भगवते मीमांसाद्वयगुरवे रामानुजार्याय।

195 9. G. 58.

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 61 Foll. 13 × 8¼ inches. 20 lines in a page. Kannaḍa script. Old. Good. Good writing.

Contains the adhyāya 12 complete.

Beginning :

अज्ञानतिमिरध्वंसि + इयं मे मतिः।

(सू०)—तन्त्रिसमवाये चोदनातः समानानामैकतन्त्र्यमतुल्येषु तु भेदः स्याद्विधिप्रक्रमतादर्थ्यात् श्रुतिकालनिर्देशात्। इह तन्त्वरत्नादौ तन्त्ररूपप्रयोगपरिमाणे चिन्तितेऽधुना तत्परिमाणमेव प्रसङ्गरूपं चिन्त्यत इत्युक्त्वा एकदेशकालकर्तृकाण्यङ्गानि द्वादशानामेव बहूनामपि प्रधानानां सकृत्कृतान्येवोपकर्तुं शक्नुवन्ति।

End :

द्वादशलक्षणात्मकमीमांसाशास्त्रप्रमेयमर्थं विचारितमुपसंहरति—तदेवमिति। एवं द्वादशलक्षणमीमांसाशास्त्रार्थसंग्राहकग्रन्थकरणं चित्तशुद्ध्युत्पादनद्वारा मम चेतसो भगवच्चरणयोः प्रीत्युत्पादकं भूयादिति प्रार्थयते—जैमिनेरिति। मग्नं सदित्यर्थः। तया शुद्ध्या प्रतिबन्धकापगमात् प्रीतिमेत्विति योजना।

गुरूपदेशाच्च विभावनाभि-
निर्णीय मूलार्थमतिश्रमेण।
कृतं मया टिप्पणमेतदार्यैः
संशोधनीयं गुणदोषविद्भिः॥
न यस्य शास्त्रेऽस्ति गतिर्न बुद्धेः
कुशाग्रता नो बुधसंगतिश्च।
तथापि सोऽहं प्रचकार टीकां
गुरुप्रसादैकसमाश्रयेण॥
जानन्तु मूलार्थमुताक्षिपन्तु
स्वच्छन्दमन्ये च समर्थयन्तु।
तथापि यः श्रीगुरुसेवनाप्त-
तत्त्वार्थवक्ता विरलः स कोऽपि॥
अधीतिकाले कथितं प्रमेयं
यत्पूज्यपादैर्लिखितं मया तत्।
अतिक्रमस्तेन चिरंतनानां
जातोऽपि नासौ मम दोषकारी॥
श्रीबालकृष्णकविमण्डनसूनुशंभोः
श्रीखण्डदेवचरणाम्बुजसेवकस्य।
एषा कृतिर्विविधदोषयुतापि दृश्या
मूलार्थशोधनकरीति सदाशयानाम्॥
प्रभावली हार्दतमोविनाशिनी
मीमांसकानां स्पृहणीयदर्शना।
श्रीपार्वतीवल्लभपादपद्मयो-
र्नीराजनार्थं भवतादियं मम॥
यः खण्डदेवनामासीच्छ्रीधरेन्द्राभिधां गतः।
स गुरुर्मे विजानातु टीकाकृतिपरिश्रमम्॥
वेदर्तुमुनिविधुभि(१७६४)र्गुणिते वत्सरे शुभे।
ज्येष्ठे कृष्णे रुद्रतिथावियं टीका समापिता॥ ८॥
वर्षे नेत्रद्विसप्तद्विजपतिगणिते(१७२२)मासि चैषेकरक्षे
वारे जैवे प्रभाते सकलपितृतिथौ प्रोष्ठपद्याः परस्य।
काश्यां श्रीब्रह्मनाडीनिरुपमचरितः खण्डदेवाभिधानः
प्राप्तः श्रीब्रह्मभावं विबुधवरगुरुः श्रीधरेन्द्रो यतीन्द्रः॥

Colophon :

इति श्रीमत्पूर्वोत्तरमीमांसासाम्राज्यपारावारपारीणधुरीणश्रीमत्खण्डदेवान्तेवासिकविमण्डनबालकृष्णभट्टात्मजश्रीमच्छंभुभट्टविरचितायां प्रभावल्याख्यायां श्रीमद्भाट्टदीपिकाव्याख्यायां द्वादशस्याध्यायस्य चतुर्थे

पादे चतुर्दशमधिकरणम्। समाप्तोऽयं चतुर्थः पादः। समाप्तश्चायं द्वादशोऽध्यायः। समाप्ताचेयं पूर्वमीमांसा द्वादशलक्षणी।

196 10. I. 28.

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 91 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 16 lines in a page. Devanāgarī script. New. Good. Good writing.

Contains the adhyāya 11 complete.

Beginning :

अज्ञानतिमिरध्वंसि + इयं मे मतिः।

(सू)—प्रयोजनाभिसंबन्धात् पृथक्सतां ततः स्यात् ऐककर्म्यमेकशब्दाभिसंयोगात्। अत्र वार्तिककृता दशमे बाधाभ्युच्चयलक्षणं वृत्तमिति भाष्योक्त्याभ्युच्चयस्य शास्त्रार्थत्वाभावेनाध्यायार्थत्वानुपपत्ति बाधाभावस्यैवाभ्युच्चयत्वात् निरूपणीयत्वसंभवेन परिहत्यार्थभेदादध्यायभेदापत्तौ बाधाभ्युच्चयद्वारेणानुष्ठेयपदार्थपरिमाणस्यैवैकस्याध्यायार्थत्वाङ्गीकारेण परिहृतम्।

End :

तन्त्वन्यायाप्रवृत्तावर्थसिद्धाया एवावृत्तेरिहापवादत्वेन निरूपणात नाध्यायार्थत्वमित्यभिप्रेत्य निरूपितमध्यायार्थमुपसंहरति—तदेवमिति।

Colophon :

इति श्रीमत्पूर्वोत्तरमीमांसा + एकादशस्याध्यायस्य चतुर्थः पादः। अध्यायश्च समाप्तः।

197 11. I. 29.

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 453 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 16 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in two volumes.

Contains the adhyāya 6 complete.

अज्ञानतिमिरध्वंसि + इयं मे मतिः।

(सू)—द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसंबन्धः। पूर्वाध्यायार्थोत्तराध्यायार्थनिरूपणयोरवसरसंगतिं हेतुहेतुमद्भावसंगतिं च दर्शयति—एवमिति। एवं प्रमाणलक्षणसापेक्षैर्भेदाभेदशेषशेषिप्रयोजकाप्रयोजकैवंक्रमनिरूपणपरैश्चतुर्भिरध्यायैरित्यर्थः।

End :

न च पश्वन्तरोपादाने तथानुष्ठातुं शक्यत इत्यर्थात् छागेन पशुना यजेतेति छागपशुशब्दयोर्विशेषणविशेष्यभावः सिद्धो भवतीति अयमेव प्रकारो मूलस्थवाक्यैकवाक्यपदेन गृह्यते। अध्यायार्थमुपसंहरति—इति निरूपित इति।

Colophon :

इति श्रीपूर्वोत्तरमीमांसा + षष्ठाध्यायस्याष्टमः पादः।

198 39. B. 13.

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 156 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Contains the 1st pāda (incomplete) of the 9th adhyāya.

Beginning :

अज्ञानमितिरध्वंसि + इयं मे मतिः।

(सू)—यज्ञकर्म। प्रकृतावुपदिष्टेषु पदार्थेषु यथोपदेशमनुष्ठेयेषु वक्ष्यमाणान्यथाभावात्मकोहस्यातिदिष्टेष्वेव च संभवादतिदेशनिरूपणोत्तरं तदारम्भो

युक्त इति पूर्वोत्तराध्यायार्थनिरूपणयोर्हेतुहेतुमद्भावसंगतिं दर्शयति—तदेवं सिद्धेति।

End :

कौस्तुभे व्यक्तमिति। ज्योतिष्टोमे तावत् तत्तद्विनियोगविध्यनुसारेण नानावेदस्वरे प्राप्ते दर्शपूर्णमासप्रकृतिकाङ्गविषये प्राकृतेन स्वरेण तस्य बाधः। तत्रापि यत् किंचित्प्राचीनमिति वचनेनाग्नीषोमीयपशुप्राग्भाविपदार्थाङ्गत्वेन।

The transcript is said to have been made from a MS. of Tiruvālaṅgāḍu Sanskrit Library on 12-10-1924.

199 40. C. $\frac{1}{\cdot}$

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 167 Foll. 12×5 inches. 11 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing :

Contains the 1st adhyāya complete.

Date of copying.

संवत् १७९१ समये आश्विनमासे शुक्लपक्षे त्रयोदशी शनिवासरे लिखितमिदं पुस्तकं समाप्तम्। ग्रन्थसंख्या ६०६०।

200 40. C. 1$\frac{2}{\cdot}$

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 101 Foll. 12×5 inches. 11 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

Contains the 2nd adhyāya complete.

The scribe adds : ग्रन्थसंख्या ३६००।

201 40. C. 1$\frac{3}{\cdot}$

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 199 Foll. 12×5 inches. 12 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

Contains the pādas 1 to 4 of the 3rd adhyāya.

The scribe adds : ग्रन्थसंख्या १८००।

202 40. C. 1$\frac{4}{\cdot}$

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 166 Foll. 12×5 inches. 11 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

Contains the 6th adhyāya complete.

203 40. C. 1$\frac{5}{\cdot}$

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 116 Foll. 12×5 inches. 11 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

Contains the 10th adhyāya.

Fol. 97 is wanting.

204 54. A. 27.

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 193 Foll. $8 \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New Good. Good writing.

Contains the 5th adhyāya.

This is a transcript made from the MS. described above in No. 192.

205 54. A. 28.

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 123 Foll. $8 \times 6\frac{1}{2}$ inches. 14

lines in a page. Devanāgarī script. New. Good. Good writing.

Contains the 7th adhyāya complete.

This is a transcript made from the MS. described above in No. 193.

206 54. A. 29.

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 41 Foll. 8 × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Contains the 8th adhyāya complete.

This is a transcript made from the MS. described above in No. 194.

207 54. A. 30.

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 285 Foll. 8 × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Contains the adhyāya 10th complete.

This is a transcript made from the MS. described above in No. 203.

208 54. A. 31.

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 119 Foll. 8 × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Contains the 12th adhyāya complete.

This is a transcript made from the MS. described above in No. 195.

209 64926.

भाट्टदीपिकाव्याख्या प्रभावली—शंभुभट्टकृता

Paper. 144 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Contains the 10th adhyāya complete.

210 38. B. 2.

भाट्टदीपिकाव्याख्या भाट्टचन्द्रोदय:—भास्कररायकृत:

Paper. 446 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 2 volumes. The first volume contains 234 Foll. and the second 212.

The Bhāṭṭacandrodaya is a commentary on Khaṇḍadeva's Bhāṭṭadīpikā which is also called Bhāṭṭacandrikā according to this commentary. The commentator Bhāskararāya was the son of Konamāmbā and Gambhīrarāyabhāratī and the desciple of Nṛsiṁhaguru and S'ivadatta. He was also called Bhāsurānandanātha in his Dīkṣā name. He was a prolific writer. Among his other works mention may be made of his commentary on Kedārabhaṭṭa's Vṛttaratnākara and of Piṅgalacchandassūtravyākhyā Bhāṣyarāja. The former work was composed in Saka year 1627 corresponding to 1705 A.D. and the latter in 1737 A.D. (See No. 774, Vol. VI of the Des. Catalogue of Sanskrit MSS. in the Adyar Library, 1947). In the latter work he mentions his 2 more works on prosody named Chandaḥkaustubha and Chandobhāskara. In Mīmāṁsā he has written 2 more works named Saṁkarṣakāṇḍabhāṣya (No. 151 of this Vol.) and Vādakutūhala (See further No. of this Vol.) the second being a tract dealing with controversial discussions between Svāmi S'āstrin and himself in the court of the Chief Mallikārjuna. His Lalitāsahasranāmabhāṣya and Varivas'yārahasya are the famous works on the Tāntric Religion. He is said to have born the surname Bhāratī like his father. A village in the Tanjore district is called after his name as Bhāskararāyapuram. He was famous at Benares for his miraculous deeds. He belonged to the end of the 17th and the beginning of the 18th centuries A.D.

Contains the adhyāyas 1 and 2.

Beginning :

श्रीगम्भीरविपश्चित: पितुरभूद्य: कोनमाम्बोदरे
विद्याष्टादशकस्य मर्मभिदभूद्य: श्रीनृसिंहाद् गुरो: ।
यश्च श्रीशिवदत्तशुक्लचरणै: पूर्णाभिषिक्तोऽभवत्
स त्रेतात्रिपुरात्रयीति मनुते तामेव नाथत्रयीम् ॥
भागीरथीभीमरथीतटकूट: कुकूर्पट: ।
पाण्डुरङ्ग: परं ब्रह्म मम दैवं वृषाकपि: ॥
मीमांसाशास्त्रजीवातुं जैमिन्यादिमुनित्रयम् ।
सरस्वतीं च नत्वाहं व्याकुर्वे भाट्टदीपिकाम् ॥
श्रीखण्डदेवोदितभाट्टचन्द्रिकां
प्रसारयन् षोडशलक्षणीं भुवि ।
स भाट्टचन्द्र: समुदेति यं व्यधा-
न्महाग्निचिद्भास्कररायभारती ॥
परिपूर्णविधूदयान्वयव्यतिरेकानुविधायिनी मया ।
बुधदृक्कुमुदप्रबोधकृद्विशदार्था भुवि भाट्टचन्द्रिका ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नताद्यर्थं श्रीचक्रसोमयागौ श्लेषेण स्तौति—दीक्षाङ्ग इति । उमया सहित: शिव इज्यतेऽस्मिन्निति सोमयाग: । चक्रराज: तदभिन्नो ज्योतिष्टोमो वा । सदमृतं कैवल्यमाभूतसंप्लवं स्वर्गवासं वा दिशतु । चक्रं प्रकृत्य सर्वामृतमयं तथेति अपाम सोमममृता अभूमेति चागमात् । "आभूतसंप्लवं स्थानममृतत्वं हि भाष्यते" इति मात्स्यात् । स च दीक्षैवाङ्गं यस्य तादृश: ।

"द्विजानामनुपेतानां स्वकर्माध्ययनादिषु ।
यथाधिकारो नास्त्येव स्याच्चोपनयनादनु ।
तथैव दीक्षाहीनानां मन्त्रदेवार्चनादिषु ।
नाधिकारोऽस्त्यत: कुर्याद् दीक्षासंस्कारमात्मनि ॥"

इति कालोत्तरतन्त्रवचनात् दीक्षा सोमश्चेति वचनाच्च ।

Colophon of the 1st adhyāya at the end of the I volume :

इति भाट्टदीपिकाया: खण्डदेवाचार्यविरचिताया अष्टादशसहस्रग्रन्थपरिमिताया व्याख्यायां भाट्टचन्द्रोदयापराभिधायां भास्कररायस्य कृतौ प्रथमस्याध्यायस्य चतुर्थ: पाद: संपूर्ण: ।

End in the 2nd volume :

अध्यायार्थमुपसंहति—तदेवमिति । षण्णां च प्रमाणानां मध्ये कतिपयानामेकविषयोपनिपातेऽपि विरोधाभावान्न बलाबलादिविचार इत्याशयेन वक्तव्यांशापवादादुत्तराध्यायार्थमेव श्रावयति—अत: परमिति । इति सर्वं शिवम् ।

Colophon :

इति भाट्टचन्द्रिकायाश्चन्द्रोदयनाम्नि टीकायाम् ।
भास्कररायस्य कृतौ द्वितीयसर्गे चतुर्थोऽङ्घ्रि: ॥

इति श्रीगम्भीराध्वरीन्द्रस्य भारत्याख्यस्य सूनो: कवेर्भास्करस्य कृतौ भाट्टचन्द्रिकाटीकने भाट्टचन्द्रोदये पूर्णतन्त्रे द्वितीयो मयूख: । द्वितीयाध्याये चतुर्थ: पाद: समाप्त: ।

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणधुरीणनिखिलतन्त्रस्वतन्त्रभारत्युपनामकश्रीमद्गम्भीररायदीक्षि-

तात्मजभास्कररायदीक्षितमहाग्निचिता विरचिते भाट्ट-चन्द्रिकापरनामकभाट्टदीपिकाव्याख्याने भाट्टचन्द्रोदयाख्याने षोडशलक्षणे पूर्णतन्त्रे द्वितीयोऽध्याय: संपूर्ण. ।

211 27. B. 1.

भाट्टदीपिकाव्याख्या भाट्टचन्द्रोदय:—भास्कररायकृत:

Palm-leaf. 2 Foll. 15½ × 1½ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Contains a few line in the beginning.

212 39. I. 21.

भाट्टदीपिकाव्याख्या भाट्टचन्द्रोदय:—भास्कररायकृत:

Paper. 81 Foll. 8¼ × 6½ inches. 30 lines in a page. Grantha script. Old. Good. Good writing.

Contains the first adhyāya only complete.

213 36. B. 13.

भाट्टदीपिकाव्याख्या भाट्टचिन्तामणि:—वाञ्छेश्वरयज्वकृता

Paper. 104 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

This is another commentary on Khaṇḍadeva's Bhaṭṭadīpikā. The commentary is called Bhaṭṭacintāmaṇi which should not be confounded with the Bhāṭṭacintāmaṇi of Vis'ves'vara *alias* Gāgābhaṭṭa which will be described in No. 251 of this volume. The introductory verses and colophon show that he was the great-grandson of Vāñches'varasudhī also called Kuṭṭikavi, (the author of Mahiṣas'ataka, Dhātīs'ataka and Ās'īs-s'ataka), grandson of Mādhava and son of Narasiṁha. He belonged to Vis'vāmitra-gotra and Ās'valāyanasūtra. He was the author of Mahiṣas'atakavyākhyā, Hiraṇyakes'īyas'rautastūrabhāṣya, Dattacintāmaṇi, S'rāddhacintāmaṇi, Brahmasūtrārthacintāmaṇi and Kākatālīyavādārtha. He was a protege of King Sarfoji II (1798 to 1832 A.D.) of Tanjore. He was a resident of the village S'aharājapura the modern Tiruvis'anallore near Kumbakonam, Tanjore district and belonged to a Karṇāṭaka family called Hosani. He mentions his preceptors—Īs'vara, S'rīnivāsa, Ahobala, and Sāmbas'iva. In his Hiraṇyakes'īya-s'rautasūtrabhāṣya, he gives the date of the work as S'aka 1738 = 1816. Therefore he may be fixed to the end of the 18th century and the beginning of the 19th centary A.D.

Contains the pādas 1 and 2 of the I adhyāya.

Beginning :

वन्दे डुण्डि महालिङ्गं विश्वेशं मणिकर्णिकाम् ।
ईश्वरश्रीनिवासार्याहोबिलाख्यगुरूत्तमान् ॥
श्रीमत्कवेरजातीरं विद्वद्बृन्दोपशोभितम् ।
अत्युत्तमशिवक्षेत्रविष्ण्वादिक्षेत्रमस्ति हि ॥
श्रीशहराजेन्द्रपुरे श्रीशहराजेन्द्रविष्टपै: सदृशे ।
कृतवासो विमलमतिर्होशनिकर्णाटकसुधी: श्रीमान् ॥
चक्रे माहिषशतकं धाटीशतकं तथाशिषां शतकम् ।

श्लेषकविसार्वभौम: श्रीमान्वाञ्छेश्वर: स्वतन्त्रोऽसौ ॥
तस्य नप्ता माधवार्यपुत्रश्रीनरसिंहत: ।
वेदवेदाङ्गतत्त्वज्ञात्सर्वशिष्टाग्र्यपूजितात् ॥
लब्धजन्माधीतशास्त्रो वेदार्थैकनिविष्टधी: ।
माहिषं शतकं येन प्रपितामहनिर्मितम ॥
व्याख्यातमतिगम्भीरं पितृप्रोक्तेन वर्त्मना ।
हिरण्यकेशिसूत्रं च व्याख्यातं कृत्स्नमेव हि ॥
दत्तचिन्तामणिं चैव श्राद्धचिन्तामणिं तथा ।
कृतवान् ब्रह्मसूत्रार्थचिन्तामणिमनुत्तमम् ॥
काकतालीयवादार्थ: कृतो येनातिदुर्घट: ।
श्रीवाञ्छेश्वरनामासौ तनुतेऽद्य यथामति ॥
श्रीभाट्टदीपिकाव्याख्यां भाट्टचिन्तामणिं मुदा ।
दोषसत्त्वेऽपि कृपया गुणं गृह्णन्तु पण्डिता: ॥

प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्त्यर्थमिष्टदेवतानमस्कारलक्षणमनुष्ठितं मङ्गलं शिष्यशिक्षायै ग्रन्थतो निबध्नंश्चिकीर्षितं प्रतिजानीते—विश्वेश्वरमिति । विश्वस्य प्रपञ्चस्येश्वरमन्तर्यामिरूपेण नियन्तारमित्यर्थ: ।

Colophon :

इति श्रीमीमांसाधुरंधरश्रीखण्डदेवमिश्रविरचितभाट्टदीपिकाव्याख्यायां चोलदेशाग्र्यपूज्यमानविद्वत्समाजविराजमानशाहजीन्द्रपुरवास्तव्यस्य होशलकर्णाटकजातीयस्य विश्वामिश्रगोत्रजलधिकौस्तुभस्य श्रीवाञ्छेश्वरयज्वन: कृतिषु भाट्टदीपिकाव्याख्यायां भाट्टचिन्तामण्याख्यायां प्रथमस्याध्यायस्य प्रथम: पाद: ।

End :

पदार्थविधयेति । प्राशस्त्यस्य बलवदनिष्टाननुबन्धित्वरूपतया पदार्थत्वेन वाक्यार्थत्वसंभवादिति भाव: ।

214 41. A. 78.

भाट्टरहस्यम्—खण्डदेवकृतम्

Paper. 102 Foll. 10 × 4½ inches. 12 lines in a page. Devanāgarī script. Old. Good. Good writing.

This is one of the three works written by Khaṇḍadeva, the other two being the Bhāṭṭadīpikā and Mīmāṁsākaustubha. This work deals with the S'ābdabodha of sentences according to the principles of the Mīmāṁsā school of philosophy. Incidentally he criticizes the views of the Naiyāyikas and Vaiyākaraṇas on the subject. The work has been printed in the S'āstramuktāvali Series No. 2, Kānchīpuram in 1900 for the first Pariccheda only. In the introduction of that edition the editor opines that the work has four Paricchedas. Khaṇḍadeva may be fixed in the beginning of the 17th century A.D.

Contains the first Pariccheda only.

Beginning :

स्मृत्वा स्मृत्वा पुरारातिं तत्प्रसादावलम्बनात् ।
रहस्यं भाट्टतन्त्रस्य विशदीकर्तुमीश्महे ॥
यज्ज्ञानान्न्यायसाहस्री स्फुटीभवति तत्त्वत: ।
तद्रहस्यं खण्डदेव: प्रकाशयितुमुद्यत: ॥

तत्र द्वादशलक्षण्यां धर्माधर्मौ जैमिनिना अनुष्ठानोपयोगितया विचारितौ । अत एव यद्यपि धर्म: क्षरति कीर्तनात् इत्यादौ वैशेषिकतन्त्रे च क्रियाजन्यादृष्टे धर्माधर्मप्रयोग: । तथापि धर्म:स्वनुष्ठित: पुंसामित्यादौ तज्जनकविहितनिषिद्धक्रियायां तच्छब्दप्रयोगात् तदिह प्राधान्येन विचार्येते ।

End :

अत्र क्रमेण प्रतियोगित्वमनुयोगित्वं च सप्तम्यर्थ: ।
स्वस्वसंबन्ध्यैश्वर्यसंबन्धीतरवृत्तित्वमाख्यातार्थे संसर्ग: ।

अधिस्तात्पर्यग्राहकः । रामप्रतियोगिकस्वस्वाश्रया भूः । भूवृत्तिस्वस्वप्रतियोगी राम इति फलितोऽर्थः । तत्सिद्धं सप्तम्यर्थः शक्यो लाक्षणिको वा सर्वोऽपि भावनान्वयीति । तदेवं लिङ्गसंख्याव्यतिरिक्तसुबर्थमात्रस्य सिद्धो भावनान्वयः ।

Colophon :

इति श्रीखण्डदेवविरचिते भाट्टरहस्ये प्रथमः परिच्छेदः ।

Then the following few extra lines are added by the scribe :

विकल्पस्याष्टौ दोषाः—तथाहि व्रीह्यनुष्ठाने तावत् यवशास्त्रस्य सतोऽनुष्ठापकत्वात् प्रतीतप्रामाण्यत्यागरूप एको दोषः (१) अप्रतीताप्रामाण्यकल्पनं च निष्प्रमाणकमपरः (२) यद्यपि संदेहे विपर्ययजनकत्वरूपमप्रामाण्यं संदेहविकल्पयोः दोषजन्यत्वात् वेदे च तदसंभवात् कल्पयितुमशक्यम्, तथापि प्रामाण्याभावरूपमेवाप्रामाण्यं कल्प्यते । तस्य च प्रामाण्यानुपलम्भप्रमाणकत्वात् यवशास्त्रे च प्रामाण्यस्य प्रत्यक्षमुपलभ्यमानत्वेन तदनुपलम्भाभावादप्रमाणकत्वम् । तृतीयचतुर्थौ च पुनः यवानुष्ठानवेलायां यवशास्त्रस्यैव परित्यक्तप्रामाण्योज्जीवनात् कल्पिताप्रामाण्यत्यागाच्च दोषौ । एवं व्रीहिशास्त्रेऽपि चत्वारो दोषाः ।

The printed edition adds the following verses before the colophon of the first Pariccheda :

नवीनानां नानामननविशदानामयमहो
सुयुक्तीनां पुञ्जैरिह विरचितः कोऽपि जगति ।
महातर्कस्तर्कप्रथिततमसंजाततमसां
सुधाक्रन्मीमांसामतकुमुदपूरस्य जयतु ॥

यद्वद्धनानां पटलो विशालो
विलोक्यतेऽल्पे किल दर्पणेऽपि ।
तद्वन्मन्दीयेऽपि निबन्धनेऽस्मि-
न्नुद्वीक्ष्यतां भाट्टरहस्यसारः ॥

215 23. M. 1.

भाट्टरहस्यम्—खण्डदेवकृतम्

Palm-leaf. 93 Foll. $15\frac{1}{2} \times 1\frac{1}{2}$ inches. 8 lines in a page. Grantha script. Old Injured. Clear writing.

Contains the first Pariccheda incomplete.

216 25. B. 18.

भाट्टरहस्यम्—खण्डदेवकृतम्

Palm-leaf. 113 Foll. $14\frac{1}{2} \times 1\frac{1}{2}$ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the first Pariccheda incomplete.

217 26. C. 26.

भाट्टरहस्यम्—खण्डदेवकृतम्

Palm-leaf. 90 Foll. 13×2 inches. 10 lines in a page. Telugu script. Old. Injured. Good writing.

Contains the first Pariccheda complete.

The last leaf is broken into two pieces.

The second half of the stanza नवीनानां etc. at the end is read here thus :

महातर्कातर्किप्रथिततमसंजाततमसां
सुधांशुर्मीमांसामतकुमुदिनीपारमभजत् ॥

The scribe adds :

गोदापदाम्बुजस्यन्दिमरन्दास्वादलोलहृत् ।
लिलेख वरदार्याख्यो रहस्यं भाट्टपद्धतेः ॥
भाट्टसिद्धान्तशुद्धान्तविहाररसिका मतिः ।
ममासीद्यत्प्रसादेन स कृष्णगुरुरेधताम् ॥

218 26. M. 17.

भाट्टरहस्यम्—खण्डदेवकृतम्

Palm-leaf. 45 Foll. $18 \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Contains the first Pariccheda incomplete.

219 26. N. 13.

भाट्टरहस्यम्—खण्डदेवकृतम्

Palm-leaf. 79 Foll. $14\frac{1}{4} \times 2$ inches. 14 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the first Pariccheda Complete.

220 27. B. 5.

भाट्टरहस्यम्—खण्डदेवकृतम्

Palm-leaf. 72 Foll. $19\frac{1}{2} \times 1\frac{1}{8}$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the first Pariccheda incomplete.

221 28. J. 53.

भाट्टरहस्यम्—खण्डदेवकृतम्

Palm-leaf. 74 Foll. $15 \times 1\frac{1}{2}$ inches. 11 lines in a page. Grantha script. Old. Good. Good writing.

Wooden boards are added to both sides.

Contains the first Pariccheda complete.

222 29. L. 29.

भाट्टरहस्यम्—खण्डदेवकृतम्

Palm-leaf. 102 Foll. $19 \times 1\frac{1}{4}$ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Contains the first chapter.

223 36. B. 14.

भाट्टरहस्यम्—खण्डदेवकृतम्

Paper. 63 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Contains the first Pariccheda incomplete.

Copied by Sri V. Vijayarāghavācārya on 15-9-1915.

224 27. H. 1.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Palm-leaf (S'rītāla). 300 Foll. $14\frac{3}{4} \times 2\frac{1}{2}$ inches. 20 lines in a page. Grantha script. Old. Slightly injured. Good writing. The leaves marked with serial numbers 1 to 299 with a supplimental leaf *32a*. Three extra leaves are added in the beginning, one being a duplicate of the leaf *32a* and the other two left blank.

Wooden boards are added to both sides.

The Mīmāṁsākaustubha *alias* Bhāṭṭakaustubha is an elaborate commentary by the famous Khaṇḍadeva, on Jaimini's Pūrvamīmāṁsāsūtras according to the view of the modern school. It is believed that the author wrote this work first and then the other two works namely Bhāṭṭadīpikā and Bhāṭṭarahasya. According to the statement of S'aṁbhubhaṭṭa in his commentary on the Bhāṭṭadīpikā, the Mīmāṁsākaustubha is known to have extended only up to the 7th adhikaraṇa *i.e.* Balābalādhikaraṇa of the 3rd pāda of the 3rd adhyāya. The work has been represented by two printed editions, *viz.* the S'āstramuktāvali Series, Kāñcīpuram and the Chowkhamba Sanskrit Series, Benares. The author Khaṇḍadeva belonged to the beginning of the 17th century A.D.

The MS. begins in the 2nd pāda of the 1st adhyāya and ends in the 7th adhikaraṇa in the 3rd pāda of the 3rd adhyāya.

Beginning :

विघ्नध्वान्तनिवारणैकतरणिर्भक्तैकचिन्तामणि-
विद्याकाननगाहनैकसरणिर्मच्चित्तभूषामणिः ।
भूयादेष कुतर्ककर्कशधियां हर्तापहर्ता तथा
मोहानां सुधियां सदैव सविता कात्यायनीशात्मजः ॥
बृन्दाविपिनविहारी गिरिवरधारी स्वकीयसुखकारी ।
मच्चित्तरङ्गचारी भूयान्नृत्यप्रियः कृष्णः ॥
शश्वद्बोधतरङ्गा विद्यागङ्गोत्तमाङ्गे यस्य ।
श्रीरुद्रदेवसंज्ञं जनकं वन्दे सदा स्फूर्त्यै ॥

(सू)—आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते । अत्र सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वम्, वायुर्वै क्षेपिष्ठेत्यादयोऽर्थवादाः धर्माधर्मयोः प्रमाणं न वेति संदेहः । अत्र लक्षणसंगतिर्धर्माधर्मप्रमाणनिरूपणात्सुलभैव । यस्यापि मते वेदप्रामाण्यनिरूपणमध्यायार्थः, तस्याप्यस्मिन्नधिकरणे तावत्संगतिः सुलभैव ।

End :

अतश्च रागप्रमिते विरोधाभावान्न विकल्पापत्तिः । अतः कथं प्राप्तबाधत्वावच्छेदेन प्रापकशास्त्रस्य बाधकशास्त्रेण स्वविषयविषयकताप्रतिबन्ध इति चेन्न, तत्राप्यभावावच्छिन्नप्रयोगे प्रापकशास्त्रीयविषयताप्रतिबन्धेन बाधकाभावात् । रागप्राप्तनिषेधे त्वर्थवशसंपन्ना प्रवृत्तिरिति प्रतिबन्धकत्वेऽपि प्रामाण्यविषयताप्रतिबन्धाभावात् बाधव्यवहारो भाक्त इत्यनुसंधेयम् । तस्मात्सिद्धं श्रुतिलिङ्गादप्राप्त एवेति सूत्रप्रयोजनं स्पष्टम् ।

श्रीरुद्रदेवसूनोः कृतिरेषा खण्डदेवस्य ।
मीमांसाकौस्तुभाख्या शेषाध्याये तृतीयोऽङ्घ्रिः ॥
मीमांसाम्बुनिधिं प्रमथ्य विविधैर्न्यायोच्चयैर्निर्जरैः
कृत्वा जैमिनिसूत्रमन्दरममुं वेदं तथा वासुकिम् ।
यद्धालाहलसंज्ञमेव कलितं ग्रन्थान्तरं सज्जनैः
श्रीकृष्णस्य तु भूषणाय स परं यः कौस्तुभाख्यो मणिः॥

Colophon :

इति श्रीखण्डदेवकृतौ मीमांसाकौस्तुभे तृतीयाध्याये तृतीयपादस्य पूर्वार्धं समाप्तम् ।

Then the scribe adds the following 2 stanzas taken from the end of the Hayagrīvasṭotra of Sri Vedāntades'ika :

व्याख्यामुद्रां करसरसिजैः पुस्तकं शङ्खचक्रे
बिभ्रद्भिन्नस्फटिकरुचिरे पुण्डरीके निषण्णः ।
अम्लानश्रीरमृतविशदैरंशुभिः प्लावयन्मा-
माविर्भूयादनघमहिमा मानसे वागधीशः ॥

वागर्थसिद्धिहेतोः पठत हयग्रीवसंस्तुतिं भक्त्या ।
कवितार्किककेसरिणा वेंकटनाथेन विरचितामेताम् ॥

225 9. E. 47.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Paper. 203 Foll. $11 \times 4\frac{1}{4}$ inches. 14 lines in a page. Telugu script. Old. Injured. Legible writing.

The leaves are marked with the serial numbers 1 to 212 but the following leaves are missing: Nos. 28, 30, 31, 42 to 44 and 64 to 67. Two leaves are marked with the number 179.

Contains the pādas 3 and 4 of the 1st adhyāya.

226 10. E. 38.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Paper. 121 Foll. $9\frac{1}{2} \times 4\frac{1}{2}$ inches. 9 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

Contains the 2nd pāda of the 2nd adhyāya only.

Reads the following colophon :

इति श्रीमत्पूर्वोत्तरमीमांसापारावारपारीणश्रीरुद्रदेवसूनोः खण्डदेवस्य कृतौ मीमांसाकौस्तुभे द्वितीयाध्यायस्य द्वितीयः पादः समाप्तः ।

The scribe adds :

संवत् १८८९ क्रोधिनामसंवत्सरे उत्तरायणे ग्रीष्मऋतौ वैशाखकृष्णदशमीभौमवासरे पराडकरोपनामकबालंभट्टेन लिखितम् ।

227 10. E. 60.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Paper. 85 Foll. $9\frac{1}{2} \times 4\frac{1}{2}$ inches. 11 lines in a page. Devanāgarī script. Old. Slightly injured. Good writing.

Contains the 1st pāda of the 2nd adhyāya only.

228 20. O. 13.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Palm-leaf. 40 Foll. $15 \times 1\frac{1}{2}$ inches. 6 lines in a page. Nandināgarī script. Old. Much injured. Good writing.

Contains the 1st pāda of the 2nd adhyāya without beginning.

229 22. O. 24.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Palm-leaf. 32 Foll. $15\frac{1}{2} \times 1\frac{1}{4}$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

The leaves are marked क to स.

Contains the 2nd pāda (incomplete) of the 1st adhyāya.

230 23. O. 13.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Palm-leaf. 43 Foll. $15 \times 1\frac{1}{2}$ inches. 6 lines in a page. Nandināgarī script. Old. Much injured. Good writing.

Contains the 1st pāda of the 2nd adhyāya without beginning.

231 25. B. 16.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Palm-leaf. 42 Foll. $18 \times 1\frac{1}{4}$ inches.

8 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Contains the 2nd pāda of the 1st adhyāya and a fragment without the beginning and end of the 2nd pāda of the 2nd adhyāya.

232 26. C. 36.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Palm-leaf. 95 Foll. 13 × 1¾ inches. 10 lines in a page. Telugu and Grantha scripts. Old. Slightly injured. Illegible writing.

Wooden boards are added to both sides.

Contains the pādas 1 to 3 (incomplete) in the 3rd adhyāya.

223 26. K. 3.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Palm-leaf. 75 Foll. 18 × 1⅜ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

First three leaves are half-broken.

Contains the 4th pāda of the 1st adhyāya only.

234 26. M. 2.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Palm-leaf. 51 Foll. 17 × 1 inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Contains the 1st pāda alone of the 2nd adhyāya.

235 26. M. 12.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Palm-leaf. 91 Foll. 15½ × 1¼ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Contains the 2nd pāda of the 2nd adhyāya.

236 26. M. 18.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Palm-leaf. 55 Foll. 17¾ × 1 inches. 9 lines in a page. Grantha script. Old. Injured. Legible writing.

Contains the pādas 3 and 4 of the 2nd adhyāya.

ख्याताननतपरित्राणो वीतोपाधिकृपानिधिः ।
सीतया दीव्यमानो मे दाता भवतु संपदाम् ॥
विघ्नान्धकारतरणिः कृपया विधत्तां
निघ्नः स यस्य शिवयोरपि माधवस्य ।
कार्यप्रसिद्धिमपि बोधसुधांशुवृद्धिं
बालेन्दुरेष शुचिपक्षरुचिः सदा मे ॥
अज्ञानान्धतमोनिवर्तनपटुः श्रीरामचन्द्रोऽमलं
बोधेन्दुं सकलाभिरम्यसुकलाभी राजितं सर्वदा ।
पूर्वान्योत्तमपक्ष एव नितरां राजत्प्रतापश्रियं
सम्यग्दूषितपूर्वपक्षमचिरादाविष्करोतु प्रभुः ॥

237 26. O. 13.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Palm-leaf. 105 Foll. 15 × 1¼ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Foll. are numbered in two parts, the first containing 1 to 59 and the second 1 to 46.

Contains the pādas 1 and 3 of the 2nd adhyāya.

238 27. H. 2.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Palm-leaf. 145 Foll. 17½ × 2¼ inches. 16 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Wooden boards are added to both sides.

Begins in the 4th pāda of the 1st adhyāya and goes on up to the end of the 2nd pāda of the 3rd adhyāya.

The fly-leaf found at the beginning reads the following :

बृन्दाविपिनविहारी गिरिवरधारी स्वकीयसुखकारी।
मच्चित्तरङ्गचारी भूयान्नृत्यप्रियः कृष्णः ॥

The former owner of the MS :

मीमांसाकौस्तुभः अण्णादीक्षितस्य ॥

He was probably the same as author of the Tantradarpaṇa.

The following verses of the scribe are found at the end

श्रीकालीनगरीराजच्छ्रीनिवासार्यसूनुना ।
मीांसाकौस्तुभग्रन्थो लिखितो रामशर्मणा ॥
श्रीकालीनगरावासा कृपामृततरङ्गिणी ।
क्षेमं क्षेमंकरी देवी करोतु स्थिरसुन्दरी ॥

239 27. H. 3.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Palm-leaf. 136 Foll. 18 × 1½ inches. 8 lines in a page. Telugu script. Old. Injured. Clear writing.

Contains the pādas 1 to 4 of the 2nd adhyāya.

240 30. I. 17.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Palm-leaf. 79 Foll. 17¼ × 1⅜ inches. 8 lines in a page. Grantha script. Old. Slightly injured. Good writing.

Contains the 4th pāda of the 1st adhyāya.

241 33. K. 31.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Palm-leaf (S'rītāla). 88 Foll. 13 × 1⅝ inches. 16 lines in a page. Telugu script. Old. Slightly injured. Good writing.

Contains the pādas 1 and 4 (incomplete) of the 1st adhyāya.

242 34. L. 21.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Palm-leaf (S'rītāla). 224 Foll. 17 × 2¼ inches. 21 lines in a page. Grantha and Telugu scripts. Old. Slightly injured. Good writing.

Wooden boards are added to both sides.

Contains up to the 7th adhikaraṇa of the 3rd pāda of the 3rd adhyāya.

The scribe adds :

प्रजोत्पत्त्यभिधे वर्षे मेषस्याह्नि द्वितीयके ।
सुब्रह्मण्येन लिखितो मीमांसाकौस्तुभः शुभः ॥

243 39. I. 20.

मीमांसाकौस्तुभः—खण्डदेवकृतः

Paper. 47 Foll. 8¾ × 6 inches. 30 lines in a page. Grantha script. Old. Good. Good writing.

Contains the 1st pāda of the 2nd adhyāya.

244 38. B. 7.

अध्वरमीमांसाकुतूहलवृत्तिः—वासुदेवदीक्षितकृता

Paper. 1659 Foll. 8¼ × 6½ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

Bound in 9 volumes containing Foll. 98, 166, 161, 247, 218, 132, 198, 247 and 192 respectively.

This is an elaborate and easy commentary on the Pūrvamīmāṁsāsūtras of Jaimini. The author Vāsudevadīkṣita is identical with the author of the Bālamanoramā, the most popular and useful commentary on Bhaṭṭoji's Siddhāntakaumudī. He was the son of Mahādevavājapeyin and Annapūrṇāmbā. He was the pupil of Visvesvaravājapeyin, his elder brother. He is said to have acted as *adhvaryu priest* in the sacrifices performed by Ānandarāyamakhin, the famous minister of the Kings-S'āhaji (1684 to 1710 A.D.), Sarfoji (1711 to 1727 A.D.) and Tukkoji (1728 to 1735) of Tanjore. Therefore, he can be assigned to the first half of the 18th century A.D. He has also written a commentary on the Bodhāyana-S'rautasūtrā.

Contains from the 3rd pāda of the 3rd adhyāya to the end of the 11th adhyāya.

Beginning :

निर्मन्थ्य निगमसिन्धून् विविधन्यायाभिधानमन्थानैः।
धर्मसुधामुद्धरते भूयो मुनये नमोऽस्तु जैमिनये ॥
जैमिनिमतिप्रसृष्टां शबरकुमारप्रकामनिष्कृष्टाम्।
मीमांसां मीमांसारीत्या वृत्त्या परिष्कुर्वे ॥
स्फायच्छाबरभाष्यवार्तिकमहाग्रन्थैकलोलीभव-
त्क्षुभ्यज्जैमिनिसूत्रजालमपृथग्भूरिप्रचारं श्लथम्।
उद्धृत्य स्फुटबालबोधनकृते श्रीवासुदेवाध्वरी
तत्कौतूहलवृत्तिमाकलयते सन्तो दयन्तामिह ॥

इह खलु धर्मार्थकाममोक्षाणां चतुर्णां पुरुषार्थानां मध्ये मोक्ष एव परमपुरुषार्थः, नित्यत्वात्; न स पुनरावर्तत इति श्रुतेः । इतरेषां त्रयाणां न तथात्वम्, अनित्यत्वात्; तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयत इति श्रुतेः । स मोक्षश्च ब्रह्मज्ञानादेव सिध्यति; नान्यः पन्था विद्यतेऽयनाय, ब्रह्मविदाप्नोति परमित्यादिश्रुतिभ्यः । तद् ब्रह्म चाध्यारोपापवादाभ्यां ज्ञातव्यम् ।

अध्यारोपापवादाभ्यां ज्ञातव्यस्तत्त्वनिर्णयः ।
न कर्मणा न प्रजया त्यागेन न धनेन वा ॥

इति वचनात् । तस्मान्मुमुक्षुणाध्यारोपोऽपवादश्चावश्यं ज्ञातव्यौ । तत्राध्यारोपो नाम शुक्तिकायां रजतवत् रज्जौ सर्पवत् स्थाणौ पुरुषवच्च निष्प्रपञ्चात्मवस्तुनि प्रपञ्चारोपः । अयमध्यारोपो वस्त्वज्ञानादागतः । तदज्ञानमेवाविद्या तमो मोहो मूलप्रकृतिः प्रधानं गुणसाम्यमव्यक्तं मिथ्येति चोच्यते ।

End:

नित्यशुद्धबुद्धमुक्तसत्यपरमानन्दाद्वयब्रह्मरूपेण तिष्ठति । एतावदेवाचार्येण वक्तव्यम्, शिष्येण च श्रोतव्यम् । इतः परं वक्तव्यं श्रोतव्यं च नास्तीति सिद्धम् ।

Colophon :

इति परमहंसपरिव्राजकाचार्यश्रीवासुदेवेन्द्रविरचितमननप्रकरणे द्वादशवर्णकं समाप्तम् ।

1136 20. E. 42.

वासुदेवमननसंग्रहः

Palm-leaf. 101 Foll. $9 \times 1\frac{3}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Complete; but wants the first leaf in the beginning.

1137 21. D. 3.

वासुदेवमननसंग्रहः

Palm-leaf. 9 Foll. 16×1 inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Incomplete.

1138 22. D. 41.

वासुदेवमननसंग्रहः

Palm-leaf. 51 Foll. $15\frac{1}{2} \times 1\frac{1}{4}$ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Incomplete.

1139 24. C. 18.

वासुदेवमननसंग्रहः

Palm-leaf. 42 Foll. $16\frac{1}{2} \times 2$ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete.

1140 25. N. 11.

वासुदेवमननसंग्रहः

Palm-leaf. 16 Foll. $15 \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Reads the following additional verse in the beginning :

श्रीहरिं परमानन्दमुपदेष्टारमीश्वरम् ।
व्यापकं सर्वलोकानां कारणं तं नमाम्यहम् ॥

1141 26. H. 4.

वासुदेवमननसंग्रहः

Palm-leaf. 6 Foll. $16 \times 1\frac{1}{2}$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Contains a small portion in the beginning.

Adds the following verses in the beginning :

स्नातं तेन समस्ततीर्थनिचये दत्तं महीमण्डलं
विप्रेभ्यः पितृदेवताः सुरगणैः सर्वे च संतर्पिताः ।
जप्ता मन्त्रसहस्रकोटिरमुना तप्तं च तीर्थे तपो
यस्य ब्रह्मविचारणे क्षणमपि प्राप्नोति धैर्यं मनः ॥
मूकाम्बिकाकटाक्षान्मोहविहीनं करोति शिष्यं यः ।
तमहं शेषगिरीशमशेषवेदान्तदेशिकं वन्दे ॥
ब्रह्मज्ञानं परमसुखदं केवलं ज्ञानमूर्तिं
विश्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम् ।
एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं
भावातीतं त्रिगुणरहितं सद्गुरुं तं नमामि ॥

1142 26. H. 21.

वासुदेवमननसंग्रहः

Palm-leaf. 25 Foll. $10 \times 1\frac{1}{4}$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Incomplete.

1143 28. N. 13.

वासुदेवमननसंग्रहः

Palm-leaf. 27 Foll. $15\frac{1}{2} \times 1\frac{1}{2}$ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

One extra leaf added at the end contains some horoscopes evidently belonging to the former owner's family.

1144 9. B. 24.

वासुदेवमननसंग्रहसारः

Paper. 11 Foll. 6×4 inches. 19 lines in a page. Telugu script. Old. Injured. Illegible writing.

This is a further abridgment of the Vāsudevamananasaṁgraha described above. The subjects dealt with in each of the chapters are briefly versified in 46 subdivisions called Varṇakas. The author's name is not known.

Beginning :

बोधानन्दघनं निरस्तसकलं कारुण्यपूर्णेक्षणं
मूढानामुपदेशकं च सततं पापात्मनां पापहम् ।
वैराग्यं च विरागिणां सुखकरं संपादकं सर्वदा
श्रीमद्देशिकवासुवदेवयमिनं मूढात्मकोऽहं भजे ॥

यस्यात्मभूतस्य गुरोः प्रसादा-
दहं विमुक्तोऽस्मि शरीरबन्धात् ।
सर्वोपदेष्टुः पुरुषोत्तमस्य
तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम ॥
मूढान् विवेकिनः कृत्वा लोके सर्वोपदेशकः ।
यस्तिष्ठति च तं श्रीमद्वासुदेवगुरुं भजे ॥
अनुग्रहार्थं मर्त्यानां संस्कृतानधिकारिणाम् ।
विवेकसारः श्रोतॄणां रच्यते भाषया मया ॥

The above verses are seen in the Vivekasāra also (Vide No. 1160 further.)

अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते ।
स्थूलसूक्ष्मादिदेहानामात्मन्यारोप एव च ॥
अपवादस्ततोऽप्येषां सम्यगत्र प्रदर्शितः ।

२ प्रकरणम्

साधनचतुष्टयप्रकरणम्

यस्य साधनसंपत्तिरीश्वरस्य प्रसादतः ।
यज्ञादिकर्मकरणात्सोऽधिकारी निरूप्यते ॥

End :

आत्मानात्मविवेकं तु कृत्वास्मिन्निति यः पुमान् ।
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः ॥
इत्यात्मानात्मविवेकप्रकरणम् ।

Colophon :

इति श्रीमद्वासुदेवमनने षट्चत्वारिंशवर्णकं संपूर्णम् ।

Foll. 9*b* and 10*a* are left blank.

1145 34. D. 16.

विदेहमुक्तिप्रकरणम्––रामचन्द्रेन्द्रसरस्वतीकृतम्

Palm-leaf. 1 Fol. $15\frac{1}{2} \times 1\frac{1}{2}$ inches. 8 lines in a page. Grantha script. Old. Injured. Clear writing.

This is a very small metrical work on Advaita-Vedānta dealing with the nature of Videhamukti as distinguished from

Jīvanmukti. The author Rāmacandrendrasarasvatī was the pupil of Vāsudevendrasarasvatī.

Contains the stanzas 48 to 61 only.

Beginning :

जीवेशभेदः क्क पराक्षरेऽस्मिन्
क्क वेदपूगः क्क च शास्त्रभेदः ।
एवं प्रबोधात्परिशिष्यते यः
स रामचन्द्रोऽस्मि विदेहमुक्तः ॥ ४८ ॥
प्रत्यक्परात्माहमयं प्रपञ्चो
ब्रह्मात्मरूपो निगमप्रमाणः ।
इत्यादिनानाविधभावहीनः
स रामचन्द्रोऽस्मि विदेहमुक्तः ॥ ४९ ॥

End :

विदेहमुक्तिश्रुतिवाक्यवेद्यं
ब्रह्माहमस्मीति सुनिश्चितार्थः ।
यस्मिन् निरूप्यापि लयं प्रपन्नः
स रामचन्द्रोऽस्मि विदेहमुक्तः ॥ ५९ ॥
अष्टाधिसाहस्रमहावचोभिः
पर्वालिभिर्जातसुधामरन्दम् ।
सकृत्पिबन्तोऽपि सदैव तृप्ता
ब्रह्मैव भूत्वा प्रचरन्ति लोके ॥ ६० ॥
श्रीवासुदेवेन्द्रगुरोः प्रसादा-
च्छ्रीरामचन्द्रेन्द्रमुनीश्वरेण ।
कृता महावाक्यसहस्रवेद्य-
श्रीरामचन्द्रस्तुतिरादरेण ॥ ६१ ॥

Colophon :

विदेहमुक्तिस्वरूपप्रकरणं संपूर्णम् ।

1146 9. B. 25.

विद्युन्मालाविंशतिः—शंकराचार्यकृता

Paper. 2 Foll. 6 × 4 inches. 19 lines in a page. Telugu script. Old. Fair. Illegible writing.

Begins cn Fol. 10*b* of the MS.

20 verses written in Vidyunmālā metre by S'rī S'aṁkarācārya on the identity of the soul with the Supreme Brahman. The work is not available in print.

Complete.

Beginning :

नत्वाचार्यात्मानं श्रीशं मत्वा जीवब्रह्मैकत्वम् ।
प्राप्नोम्यद्वैतस्वाराज्यं तद्ब्रह्माहं मोहातीतम् ॥ १ ॥
शुक्तौ रूप्यं रज्जौ सर्पश्चन्द्रे द्वित्वं मरुभूम्यम्बु ।
यद्वद् दृश्यं यत्रानन्ते तद्ब्रह्माहं मोहातीतम् ॥ २ ॥

End :

नित्यं विंशत्या संख्यातैर्विद्युन्मालावृत्तं श्रुत्वा ।
निःसंदेहं पश्येत्त्वीशं तद्ब्रह्माहं मोहातीतम् ॥२०॥

Colophon :

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्गोविन्द-भगवत्पूज्यपादशिष्यश्रीमच्छंकरभगवत्पूज्यपादाचार्य-विरचितं विद्युन्मालावृत्तं संपूर्णम् ।

1147 9. F. 43.

विरक्तिरत्नावलिः

Palm-leaf. 5 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 32 lines in a page. Grantha script. Old. Injured. Illegible and small writing.

This is a metrical work on Advaita Vedānta dealing with the importance of Virakti (freedom from the worldly attachment) which leads the devotee to the Mukti (eternal emancipation). The author's name is not known.

Complete in 89 verses.

Beginning :

प्रणम्य गुरुचिद्घनं नततमस्ततिध्वंसनं
सुखाम्बुरसवृष्टिदं सुकृतिनां हृदब्जे सदा ।
करोमि चितिवृद्धये जनिविमुक्तये ज्ञानिनां
त्रयीहृदयसागरोद्भवविरक्तिरत्नावलीम् ॥ १ ॥
अपारभवसागरं चतुरशीतिलक्षोद्भव-
स्थलोर्मिचलितं सतीसुतसुतादिनक्राचितम् ।
महेश्वरपदाम्बुजप्रणयकर्णधारेरितं
न तर्तुमलमन्यतो दृढविरक्तिपोतं विना ॥ २ ॥
न रज्यति तु पावकान्मलिनमीषदप्यम्बरं
तथा सकलवासनामलिनमानसं संविदा ।
न तिष्ठति यथा रजः परमसूक्ष्मसूच्यग्रके
सरागहृदये नृणां शिवसुखाब्धिबिन्दोः कणः ॥
विनाशयति शाम्बरं निजकणांशसंस्पर्शतो
विपत्सकलशंसकृच्छ्रवणतोऽपि बोधस्तथा ।
स कामपुरुषं परं विगतकामचित्ते सदा
तथा नटति चेतनासुरसरोवरे हंसिका ॥ ४ ॥

End :

मनोरथपिशाचिका सकलधातुसंशोषिका
कुदेशगमनोत्सुका गलितभीतिदुर्वृत्तिका ।
सदा चपलचित्तदा स्मरणमात्रतो नश्यति
ध्रुवं शिवपदाब्जभक्तिरसतृप्तिसेतोर्भुवि ॥८७॥
त्वमेव परमः शिवस्त्वयि हि जातमेतज्जग-
त्त्वयि प्ररमते पुनस्त्वयि विलीयते सत्तया ।
त्वमेव सकलं जगज्जलनिधौ तरङ्गादिव
त्वमेव परमोक्तिवानहमपीति न त्वां विना॥८८॥
इमां परमपावनीं हृदि विरक्तिरत्नावलीं
सदा वहति यो नरः स तु विवेकचूडामणिः ।
भजत्यमलबुद्धिषु प्रवरतामपि श्रीपुरे-
श्वरस्य कृपयामृतं प्रलभतामनन्तं शिवम्॥८९॥

1148 8. G. 3.

विरोधवरूथिनी—उमामहेश्वरकृता

Paper. 54 Foll. 13 × 8 inches. 29 lines in a page. Telugu script. Old. Much injured. Illegible writing.

The Virodhavarūthinī is a critical work attempting to point out certain defects in the Brahmasūtrabhāṣya of S'rī Rāmānuja and supporting the view of the Advaita Vedanta. The work deals with 27 topics. The author Umāmahes'vara belonged to the Vellāla family and was the pupil of Akkayasūri, the author of the Sāhityakaumudī and Campūbhāgavatavyākyā (Nos. R. 1166 and D. 12331 of the Catalogues of Sanskrit MSS. in the Madras Govt. MSS. Library respectively). The author Umāmahes'vara is known to have written the following other works: Tattvacandrikā (No. 812 of this volume) Vedāntasiddhāntasāra (R. No. 1403 of the Madras Govt. MSS. Library) and Advaitakāmadhenu (D. No. 7526 of the Tanjore Library). The work has a counter criticism offered in the work called Virodhavarūthinīpramāthīnī by Surapuram S'rīnivāsatātācārya (D. No. 4998 of the Madras Govt. Oriental MSS. Library).

Complete.

Beginning :

परभाष्यबलं छेत्तुं विरोधानां वरूथिनीम् ।
उमामहेश्वराख्योऽहं कुर्वे वेल्लालवंशजः ॥

भगवता व्यासेन हि ब्रह्ममीमांसाशास्त्रकारेण विप्रतिषेधाच्चासमञ्जसमित्यस्मिन् सूत्रे विप्रतिषिद्धार्थकथनं सांख्यदर्शनासमञ्जस्ये कारणमित्यभाणि ।

अत:. शतं विरोधानां भाष्ये रामानुजेरिते ।
दुरुद्धरं हरेणापि हरिणापि निरूप्यते ॥

शास्त्रयोनित्वादित्यत्र हि श्रीरामानुजीयमेतदधिकरणशरीरम्—

तदिदं कारणं ब्रह्म सिध्यत्येवानुमानत: ।
अतो विचार्या वेदान्ता न तु सिद्धानुवादिन: ॥
नैतत्साध्वनुमानाद्धि कर्त्रैक्यादि न सिध्यति ।
अतस्तत्कारणं ब्रह्म वेदान्तैकप्रमाणकम् ॥

इति । इत्थं कारणत्वस्य वेदान्तप्रमाणकत्वमुक्त्वा नात्मा श्रुतेर्नित्यत्वाच्च ताभ्य इत्यस्मिन्नधिकरणे तद्विरुद्धं रामानुजेनोक्तम् । तथाच रामानुजीयं भाष्यम्— सर्वदा चिदचिद्वस्तुशरीरतया तत्प्रकारं ब्रह्म । तत्कदाचित् स्वस्माद्विभक्तव्यपदेशानर्हत्वात् सूक्ष्मदशापन्नचिदचिद्वस्तुशरीरं तत्कारणावस्थं ब्रह्म । कदाचिद्विभक्तनामरूपस्थूलचिदचिद्वस्तुशरीरं तत्कार्यावस्थम् । तत्र कारणावस्थस्य कार्यावस्थापत्तावचिदंशस्य कारणावस्थायां शब्दादिविहीनस्य भोग्यत्वाय शब्दादिमत्तया स्वरूपान्यथाभावरूपविकारो भवति ।

End:

इत्थं नियतविरोधपौर्वापर्यस्थलेऽप्यपच्छेदन्यायमङ्गीकुर्वन् अपच्छेदन्यायस्त्वनियतविरोधपौर्वापर्यविषय एवेति प्रतिजानान: कथं न लज्जसे ?

Colophon:

इति विरोधवरूथिन्यां सप्तविंशो विरोध: ।

सप्तविंशतिरेवात्र विरोधा: प्रकटीकृता: ।
अवशिष्टा विभाव्यन्तां चन्द्रिकाख्ये निबन्धने ॥
विप्रकीर्णास्तु विद्यन्ते यद्यप्येते निबन्धने ।
तथापि तत उद्धृत्य प्रत्ययार्थं प्रदर्शिता: ॥
विरोधास्त्वेत एवालं परभाष्यविनष्टये ।
किमनेकै: कशाघातैर्मुमूर्षो: स्वर्णहारिण: ॥

विरोधानां वरूथिन्या परभाष्यबलं हतम् ।
नि:शङ्कातङ्कमद्वैतसाम्राज्यमनुभूयताम् ॥

Colophon:

विरोधवरूथिनी समाप्ता ।

The work was printed in Telugu character.

1149 20. F. 44.

विरोधवरूथिनी—उमामहेश्वरकृता

Palm-leaf. 41 Foll. 15 × $1\frac{1}{8}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

The scribe adds the following verse in the beginning:

भगवन्तमुमाकान्तं चन्द्रार्धकृतशेखरम् ।
आश्रिताभीष्टदातारं त्यागराजमहं भजे ॥

It is stated that the total number of Granthas in the work is 1430.

1150 33. K. 26.

विरोधवरूथिनी — उमामहेश्वरकृता

Palm-leaf. 28 Foll. 18 × $1\frac{1}{8}$ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

1151 38. F. 25.

विरोधवरूथिनी—उमामहेश्वरकृता

Paper. 82 Foll. $8\frac{1}{4}$ × $6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. Old. New. Good. Good writing.

Complete.

This is a transcript made from the original MS. described under No. 1148 above.

1152 20. F. 55.

विवेकचूडामणि:—शंकराचार्यकृत:

Palm-leaf. 37 Foll. $13\frac{3}{4}$ × $1\frac{1}{8}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

This is a metrical Prakaraṇa work explaining the principles of Advaita Vedanta. This is believed to be one of the genuine works of S'rī Saṁkarācārya. There are many printed editions of the work.

Complete.

Beginning:

सर्ववेदान्तसिद्धान्तगोचरं तमगोचरम् ।
गोविन्दं परमानन्दं सद्गुरुं प्रणतोऽस्म्यहम् ॥
जन्तूनां नरजन्म दुर्लभमत: पुंस्त्वं ततो विप्रता
तस्माद्वैदिकधर्ममार्गपरता विद्वत्त्वमस्मात्परम् ।
आत्मानात्मविवेचनं स्वनुभवो ब्रह्मात्मना संस्थिति-
र्मुक्तिर्नो शतकोटिजन्मसु कृतै: पुण्यैर्विना लभ्यते॥
दुर्लभं त्रयमेवैतद्दैवानुग्रहहेतुकम् ।
मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रय: ॥
लब्ध्वा कथंचिन्नरजन्म दुर्लभं
तत्रापि पुंस्त्वं श्रुतपारदर्शनम् ।
यस्त्वात्ममुक्त्यै न यतेत मूढधी:
स आत्महा स्वं विनिहन्त्यसद्ग्रहात् ॥
इत: को न्वस्मि मूढात्मा यस्तु स्वार्थे प्रमाद्यति ।
दुर्लभं मानुषं देहं प्राप्य तत्रापि पौरुषम् ॥
पठन्तु शास्त्राणि यजन्तु देवान्
कुर्वन्तु कर्माणि भजन्तु देवता: ।
आत्मैक्यबोधेन विना न मुक्ति:
प्रसिध्यति ब्रह्मशतान्तरेष्वपि ॥

End:

इति श्रुत्वा गुरोर्वाक्यं प्रश्रयेण कृतानति: ।
स तेन समनुज्ञातो ययौ निर्मुक्तबन्धन: ॥
गुरुरेष सदानन्दसिन्धौ निर्मग्नमानस: ।
पावयन् वसुधां सर्वां विचचार निरुत्तर: ॥
इत्याचार्यस्य शिष्यस्य संवादेनात्मलक्षणम् ।
निरूपितं मुमुक्षूणां सुखबोधोपपत्तये ॥
हितमिममुपदेशमाद्रियन्तां
विहतनिरस्तसमस्तचित्तदोषा: ।
भवसुखविरता: प्रशान्तचित्ता:
श्रुतिरसिका यतयो मुमुक्षवो ये ॥
संसाराध्वनि तापभानुकिरणप्रोद्भूतदाहव्यथा-
खिन्नानां जलकाङ्क्षया मरुभुवि श्रान्त्या परिभ्राम्यताम् ।
अत्यासन्नसुखाम्बुधिं सुखकरं ब्रह्माद्वयं दर्शय-
न्त्येषा शंकरभारती विजयते निर्वाणसंदायिनी ॥

Colophon:

इत्याचार्यश्रीमत्परमहंसपरिव्राजकाचार्यगोविन्दभगवत्पूज्यपादशिष्यश्रीमत्परमहंसपरिव्राजकाचार्यश्रीमच्छंकरभगवत्पादकृतौ विवेकचूडामणि: संपूर्ण: ।

1153 20. F. 53.

विवेकचूडामणि:—शंकराचार्यकृत:

Palm-leaf. 6 Foll. 12 × 1 inches. 4 lines in a page. Telugu script. Old. Injured. Good writing.

Incomplete.

1154 20. H. 29.

विवेकचूडामणि:—शंकराचार्यकृत:

Palm-leaf. 68 Foll. 9 × $1\frac{1}{4}$ inches. 6

lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

The name of the scribe—Hariscandra.

One extra leaf added in the beginning contains a few lines of the Mahāsaṁkalpa.

The Fol. 20 is much injured and appended with a duplicate copy.

1155 25. K. 6.

विवेकचूडामणि:—शंकराचार्यकृत:

Palm-leaf. 35 Foll. 14 × $1\frac{1}{8}$ inches. 8 lines in a page. Grantha script. Old. Injured. Clear writing.

Complete.

1156 29. K. 38.

विवेकचूडामणि:—शंकराचार्यकृत:

Palm-leaf. 8 Foll. $12\frac{1}{2}$ × $1\frac{3}{8}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Incomplete.

1157 34. O. 25.

विवेकचूडामणि:—शंकराचार्यकृत:

Palm-leaf. 22 Foll. $9\frac{1}{2}$ × $1\frac{1}{2}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Incomplete.

1158 22. D. 88.

विवेकमुकुर:—नृसिंहभारतीकृत:

Palm-leaf. 7 Foll. $17\frac{1}{4}$ × $1\frac{1}{8}$ inches. 5 lines in a page. Grantha script. Old. Injured Good writing.

This is a small metrical treatise on Advaita Vedanta explaining the nature and characteristics of the eternal and non-eternal things. The author's name is mentioned as Nṛsiṁhabhārati about whom nothing is known in detail. He refers to a work called Yogapañcāśikā.

Complete.

Beginning :

रज्जौ सर्पवदध्यस्तं यस्मिन् विश्वं प्रतीयते ।
उपास्महे नृसिंहं तं सर्वाधिष्ठानचिद्घनम् ॥ १ ॥
त्रीन्देहान्पञ्च कोशांश्च विश्वादींस्त्रीन् शरीरिण: ।
विराट्सूत्रात्मविश्वेशान् विविनच्मि यथाक्रमम् ॥२॥
नित्यानित्यविवेकेन विविक्त: शान्तमानस: ।
भूत्वा मुमुक्षु: क्रमशो मुच्यते गुर्वनुग्रहात् ॥ ३ ॥
देह: स्थूलश्च सूक्ष्मश्च तृतीय: कारणाभिध: ।
देवनारकिमर्त्यादिभेदभाक् प्रथमोऽत्र हि ॥ ४ ॥
यज्ञादिसंभवं पुण्यं देवदेहस्य कारणम् ।
पापं नारकिदेहस्य निषिद्धाचरणोत्थितम् ॥ ५ ॥
जायते पुण्यपापाभ्यां मनुष्यादिकलेबरम् ।
देवादीनां स्थूलदेहा बहुभेदा भवन्ति हि ॥ ६ ॥

End :

समाधयो बहुविधा योगपञ्चाशिकाभिधे ।
ग्रन्थे निरूपिता: सम्यक् तत्र तानवलोकयेत् ॥ ४३ ॥
समाधिनिष्ठ: प्रविलीनचित्त:
सच्चित्सदानन्दघनश्च भूत्वा ।
प्रारब्धभोगाननुभूय साक्षी
विदेहकैवल्यपदं प्रयाति ॥ ४४ ॥
विवेकमुकुराख्येऽस्मिन् देहाद्यास्तु विवेचिता: ।
नित्यानित्यविवेकोऽस्मिन् परिदृष्टो भवेद् ध्रुवम् ॥४५॥
सुकांस्यमुकुरे दृष्टे जडात्मा दृश्यते यथा ।

विवेकमुकुरे दृष्टे चिदात्मा दृश्यते तथा ॥ ४६ ॥
विद्यारसकृपापूर्णचन्द्रोद्वेलसुखाब्धिना ।
नृसिंहभारतीशेन ग्रन्थोऽयं सुनिरूपित: ॥ ४७ ॥

Colophon :

इति विवेकमुकुर: समाप्त: ।

1159 64981

विवेकमुकुर:—नृसिंहभारतीकृत:

Paper. 7 Foll. $8\frac{1}{2}$ × $6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. Old. Injured. Good writing.

This is a transcript made from the original MS. described in the last number.

Complete.

1160 8. H. 55.

विवेकसार:

Paper. 51 Foll. 9 × 7 inches. 22 lines in a page. Telugu script. Old. Injured. Illegible writing.

Foll. 38*b* and 39*a* are left blank.

This is a Prakaraṇa work on Advaita Vedanta explaining the various principles accepted in that school. As the author, whose name is not known, salutes Vāsudevendrayati he must be the disciple of the latter. This the original work written in Sanskrit following the Vāsudevamananasaṁgraha. The work has been rendered into Tamil as described in the next number.

Incomplete.

Beginning :

बोधानन्दघनं निरस्तसकलं कारुण्यपूर्णेक्षणं
मूढानामुपदेशकं च सततं पापात्मनां पापहम् ।
वैराग्यं च विरागिणां सुखकरं संपादकं सर्वदा
श्रीमद्देशिकवासुदेवयमिनं सर्वस्वरूपं भजे ॥
यस्यात्मभूतस्य गुरो: प्रसादा-
दहं विमुक्तोऽस्मि शरीरबन्धात् ।
सर्वोपदेष्टु: पुरुषोत्तमस्य
तस्याङ्घ्रिपद्मं प्रणतोऽस्मि नित्यम् ॥
मूढान् विवेकिन: कृत्वा लोके सर्वोपदेशक: ।
यस्तिष्ठति च तं श्रीमद्वासुदेवगुरुं भजे ॥
अनुग्रहार्थं मर्त्यानां संस्कृतानधिकारिणाम् ।
विवेकसार: श्रोतृणां भाषया रच्यते मया ॥

अध्यारोपापवादन्यायेन ब्रह्म ज्ञातव्यमिति शास्त्रे सिद्धान्तितत्वेनाध्यारोपापवादौ निरूपयाम: । वस्तुन्यवस्तुन आरोप अध्यारोप: । यथा शुक्तौ रजतस्य, रज्जौ सर्पस्य, स्थाणौ पुरुषस्य, मरुमरीचिकायां जलस्य, आकाशे नीलपीतादिरूपाणामध्यारोप:, तथा निष्प्रपञ्चे आत्मनि प्रपञ्चस्यारोपोऽध्यारोप: । अस्य चाधिष्ठानाज्ञानं कारणम् । तच्चाज्ञानं प्रकृतिरिति मायेति अविद्येति तम इत्येवंप्रकारैरनेकविधमुच्यते । सत्त्वरजस्तमोगुणानां साम्यावस्था प्रकृति: । इयमेव प्रलयावस्थेत्युच्यते ।

End :

ब्रह्मरक्षस्त्वं प्राप्त: सन् अन्यत्ते दृष्टमिति राजानं बोधयित्वा वस्त्रेणालंकृत्य विभूतिं ललाटे निक्षिप्य राजन् मा भैषीरिति भयं निवारयन्तो राजानं नगरं नीतवन्त: । ततस्तं भर्जुं कशाभि: सम्यक् प्रहृत्य दूरं धावयन्ति स्म । राजा राजकीयवचनानि श्रुत्वा दोषरहितेन चक्षुषा भर्जुं दृष्ट्वापि ब्रह्मरक्ष इति यथा निश्चिकाय, तथा श्रुतिस्मृतीतिहासपुराणागमाभियुक्तवचनेषु त्वमेवात्मा त्वमेव ।

1161 25. N. 11.

विवेकसार:

Palm-leaf. 66 Foll. $14\frac{3}{4}$ × $1\frac{1}{4}$ inches.

10 lines in a page. Grantha and Tamil scripts. Old. Injured. Good writing.

This is a Tamil rendering of the Sanskrit work described above. The work is divided into two parts, the first part containing 12 chapters or Varṇakas and the second 25 Varṇakas as given below :

1st Part

१. अध्यारोपापवादप्रकरणम्, २. साधनसंपन्निरूपणम, ३. पदार्थद्वयनिरूपणम्, ४. दु:खनिरूपणम्, ५. कर्मत्रयविचार:, ६. रागद्वेषनिरूपणम्, ७. आत्मानात्मविवेक:, ८. शरीरत्रयनिरूपणम्, ९. अवस्थात्रयसाक्षिनिरूपणम्, १०. पञ्चकोशनिरूपणम्, ११. सच्चिदानन्दनिरूपणम्, १२. अखण्डार्थनिरूपम् ।

2nd Part

१. तापत्रयनिरूपणम्, २. नवविधसंसारनिरूपणम्, ३. पुर्यष्टकनिरूपणम्, ४. वैराग्यनिरूपणम्, ५. श्रवणादिनिरूपणम्, ६. षड्विधतात्पर्यलिङ्गनिरूपणम्, ७. संशयसंभावनादिनिरूपणम्, ८. वासनात्रयनिरूपणम्, ९. आसुरवासनानिरूपणम्, १०. चतुर्विंशतितत्त्वनिरूपणम्, ११. षट्त्रिंशत्तत्त्वनिरूपणम्, १२. षण्णवतितत्वनिरूपणम्, १४. ब्रह्मचर्यनिरूपणम्, १५. अजिह्वादिषट्कनिरूपणम्, १६. सप्तविधचैतन्यनिरूपणम्, १७. पञ्चविधभ्रमनिरूपणम्, १८. प्रारब्धत्रयनिरूपणम्, १९ to २१. संचितादिनिरूपणम्, २२. तार्किकदूषणम्, २३. पञ्चविधमुक्तिनिरूपणम्, २४. ज्ञानिनिरूपणम्, २५. सप्तावस्थानिरूपणम् ।

The scribe adds on Fol. 47.—Copied by Kuppā S'āstri, son of Kodaṇḍarāmas'āstri in Kanyā Lagna, 7th day of the black fortnight, Sunday, of the month of Āḍi in the year of Krodhana.

1162 22. R. 7.

विवेकसार:

Palm-leaf. 72 Foll. $11\frac{1}{2} \times 1\frac{1}{2}$ inches. 12 lines in a page. Grantha and Tamil scripts. Old. Injured. Clear writing.

This also is the Tamil version of the Sanskrit work Vivekasāra.

Incomplete.

1163 22. R. 9.

विवेकसार:

Palm-leaf. 193 Foll. $7\frac{1}{2} \times 1\frac{1}{2}$ inches. 11 lines in a page. Grantha and Tamil scripts. Old. Injured. Good writing.

This is another Tamil version of the Sanskrit work Vivekasāra.

Complete.

1164 10. B. 6.

विवेकामृतम्—गोपालकृतम्

Paper. 88 Foll. $8\frac{1}{4} \times 4\frac{1}{2}$ inches. 10 lines in a page. Devanāgarī script. Old. Injured. Good writing.

A metrical treatise on the distinction between the soul and the body, by Gopāla. The work is divided into two parts. The first part deals, in 7 chapters, with the creation of the body and the second in 10 chapters with the distruction of it. The subjects dealt with in the chapters are thus:

The first part

सृष्टिक्रम:—

१. स्वरूपसमावेशनम् ११३ verses
२. स्वानुभवदृढीकरणम् १०५ ,,
३. तत्त्वस्पष्टीकरणम् १०१ ,,
४. ईश्वरतनुत्रयकथनम् ७४ ,,
५. जीवतनुस्वरूपकथनम् ११२ ,,
६. प्रणवार्थविवरणम् ११४ ,,
७. सर्वं ब्रह्मेति निरूपणम् १५२ ,,

The second chapter

संहारक्रम:—

१. स्थूलदेहनिरसनम् ७० ,,
२. लिङ्गदेहनिरसनम् ७१ ,,
३. तनुत्रयनिरसनम् ५१ ,,
४. महाकारणदेहनिरसनम् ६२ ,,
५. ईश्वरतनुत्रयनिरसनम् ८० ,,
६. तत्पदार्थशोधनम् ७० ,,
७. मुक्तिस्वरूपकथनम् १०६ ,,
८. अद्वयस्वरूपवर्णनम् ७६ ,,
९. ,, १२१ ,,
१०. गुरुमाहात्म्यकथनम् १४५ ,,

Complete in 2 parts.

Beginning :

नित्यमव्ययमनन्तमक्षरं
सच्चिदद्वयसुखैकविग्रहम् ।
तत्त्वमादिवचनार्थमीश्वरं
भावयाम्यहमहर्निशं गुरुम् ॥ १ ॥
श्रीमुद्गलसमाख्यस्य पितु: पादाम्बुजद्वयम्
नत्वा तनोति गोपालो विवेकामृतमादरात् ॥ २ ॥
जय जय जगदीश चन्द्रमौले
स्नपय कृपामयया स्वदृष्टिवृष्ट्या ।
तदनु निजसुखैकतानसिन्धुं
समवगाह्य भवामि वीतमोह: ॥ ३ ॥
निर्गुणस्त्वं निराकारो नि:सङ्गो निर्विकारक: ।
ब्रह्मादयोऽपि न विदु: स्वस्वरूपं निरामयम् ॥ ४ ॥
त्वं ब्रह्म रससन्मूर्ध्नि विश्वबीजाङ्कुर: स्वयम् ।
त्वत्सुखाब्धेस्तरंगाभा जीवसौख्यपरंपरा: ॥ ५ ॥
जय त्वं सच्चिदानन्दतनु: षड्भाववर्जित: ।
वागाद्यगोचर: साक्षाद्यो वागादिप्रकाशक: ॥ ६ ॥
त्वदनुग्रहत: साक्षाज्जीवानां ज्ञानसंभव:
येन स्वरूपानुभवो भवेदज्ञानघातक: ॥ ७ ॥
त्वया मद्धृदये वास: कर्तव्य: सुप्तवागपि ।
बोधनीय: स्वस्वरूपं मुच्यते निर्मलं यया ॥ ८ ॥
चतुर्विधा वागपि यत्त्वत्त: समजनि स्वयम् ।
इति ज्ञात्वैव मनसा प्रार्थ्यसे त्वं निरामय: ॥९॥
स्वरूपानुभवात्स्थेयं मया निश्चलया धिया ।
परोपकारमुद्दिश्य किंचिद्वक्ष्ये त्वदाज्ञया ॥ १० ॥
भोक्ता तु तृप्त: सन्नेवातृप्तोद्गारान् करोति हि ।
एवं स्वरूपानुभवात्त्वदुद्गाराद् भवाम्यहम् ॥ ११ ॥
बाल्यसंजल्पनकरैर्वाक्यै: संतुष्टमानस: ।
चन्द्रचूडो ददौ वाचि सौष्ठवं ग्रन्थनिर्मितौ ॥ १२ ॥
वेदशास्त्रपुराणानां मथितार्थस्तु संस्कृत: ।
परमार्थो यदि भवेत्किं नादेय: सुबुद्धिभि: ॥ १३ ॥
जयत्यपेक्षाचातुर्यमेव प्रोचु: सुबुद्धय: ।
यद्ययं परमार्थ: स्यान्नादेय: किं मनीषिभि: ॥ १४ ॥
धूल्यन्त:पतितं रत्नं दवाच्चेल्लुभ्यते नरै: ।
चतुरै: किं न यत्नेन रक्षणीयं भवेच्च यत् ॥ १५ ॥
अत्के चेन्मधुभाण्डानि स्यु: संपूर्णानि कानिचित् ।
प्लवताटविभूमीषु भ्रमणं किं सुखं भवेत् ॥ १६ ॥
यद्यप्येते वाग्विलासा: श्लोषादिपरिवर्जिता: ।
परं त्वर्थविशेषाद्या नावज्ञेया मनीषिभि: ॥ १७ ॥
इक्षौ श्यामगुणाद्येऽपि पीयते रस एवहि ।

वाग्गुम्फस्याविशेषेऽपि विवेकः प्रस्फुटो गुणः ॥१८॥
रसश्लेषैः परिचिता वाक्सामान्यवधूरिव ।
अतो न विदुषां प्रीतिस्तस्यां स्वार्थसरागिणाम् ॥१९॥
वक्ता नवरसाद्ये यो वाचातिचतुरः परः ।
तथापि परमार्थस्य लाभस्तस्य न विद्यते ॥ २० ॥
तथा मयि कया नृणां रसवृत्त्या प्रभाषताम् ।
त्वं ना . . . . . परमार्थस्तु दूरतः ॥ २१ ॥
श्वपचादिगृहे पाको जातः पररसाञ्चितः ।
तथापि शिष्टैः स्प्रष्टव्यो नैवाशुद्धत्वहेतुतः ॥ २२ ॥
तथा सांसारिकीं वाचं न स्वीकुर्वन्ति पण्डिताः ।
तेषामखण्डानुभवं परं ब्रह्म प्रकाशते ॥ २३ ॥
यत्र ब्रह्मरसास्वादः स्वयमेवानुभूयते ।
वाग्गुम्फे तादृशे तु स्यात्साधूनां प्रीतिरुत्तमा ॥ २४ ॥
अतो वितन्यते ग्रन्थो विवेकामृतसञ्ज्ञकः ।
शुद्धभावनया सद्भिः श्रोतव्यः सद्विवेचकैः ॥२५॥
गुरुणा शिष्यसंवादः प्रोच्यते यद्विनोदतः ।
महानुभावैः श्रोतव्यमानन्देन स्वलीलया ॥ २६ ॥

End :

तथैवोपनिषद्वाक्यं निर्मथ्यायं विनिर्मितः ।
ग्रन्थः शिष्यजनैस्तूर्णमादेयः सिद्धभोक्तृभिः ॥
वेदशास्त्रपुराणानां मथितार्थो मया कृतः ।
स च श्रोतृजनानां हि हृदयाब्जे विराजताम् ॥
एतत्स्वसंप्रदायस्याभिमानी शंकरः स्वयम् ।
प्रीतिमाप्नोतु वचनैरेभिः सर्वेश्वरः सदा ॥
ग्रन्थोत्तरार्धं संपूर्णं शुद्धबोधप्रदं तु यत् ।
श्रीमुद्गलतनूजेन गोपालेन विनिर्मितम् ॥
कल्पनाग्निपरिप्लुष्टजीवसंतापशान्तिकृत् ।
विवेकामृतसत्पानं कर्तव्यं विबुधोत्तमैः ॥
विवेकसिन्धुं मुनिवर्यनिर्मितं
धीमन्दरेणाशु विमथ्य यत्नात् ।
लब्धं विवेकामृतमिष्टसिद्धं
निपीयतां कर्णपुटैश्चिरं बुधाः ॥
तापत्रयोत्तप्ततनुर्विवेकसिन्धुं विगाह्यैव जहाति तापम् ।
इदं विवेकामृतमाशु पीतं विमुक्तिसोपानपरंपराप्रदम् ॥

Colophon :

इति श्रीविवेकामृते संहारक्रमे गुरुशिष्यसंवादे गुरुमाहात्म्यकथनं नाम दशमं प्रकरणम् ।

The scribe adds :

सर्वधारिनामसंवत्सरे दक्षिणायने वर्षर्तौ भाद्रपदमासे कृष्णपक्षे द्वादश्यां भानुवासरे इदं पुस्तकं केशवसुतजीवणेन लिखितम्

अनेन भगवान् श्रीमद्विश्वनाथमुनीश्वरः ।
गुर्वात्मा प्रीयतां नित्यं तत्त्वज्ञानप्रदः सताम् ॥

एवं ग्रन्थसंख्या ॥ १६२२ ॥

An incomplete MS. of this work is mentioned in the Notices of Sanskrit MSS. by Rajendralalamitra, No. 1303, Vol. III, Calcutta 1876.

1165 29. L. 24.

विशिष्टाद्वैतदूषणसारसंग्रहः—ब्रह्मदेवपण्डितकृतः

Palm-leaf. 33 Foll. $17\frac{1}{2} \times 1\frac{1}{2}$ inches. 8 lines in a page. Telugu script. Old. Injured. Good writing.

An unfavourable criticism on the principles of Vis'iṣṭādvaita Vedānta. The author Brahmadevapaṇḍita was the pupil and brother's son of Malles'vasūri. He belonged to Pinninti family of the Āndhrades'a. As he quoted Nāgesa's Vaiyākaraṇamañjūṣā he must have lived later than the 18th century A.D.

Complete.

Beginning :

ब्रह्म श्रुत्यन्तवृन्दैर्यदद्वितीयं प्रकाश्यते ।
सत्यज्ञानसुखाकारं परिपूर्णं तदस्म्यहम् ॥
श्रीगौरीकान्तपदद्वन्द्वं गणनाथं सरस्वतीम् ।
नमामि भगवत्पादप्रभृतीनपि देशिकान् ॥
पिन्निण्टिब्रह्मदेवः प्रथितगुणनिधीन्मल्लसूरीन्पितृव्या-
नानम्याशेषतन्त्रेष्वतितरचतुरान्सारसंबोधदक्षान् ।
वैशिष्ट्याद्वैतवादागुणगणमधुना पूर्वनिर्माणसुस्थं
संगृह्णाति प्रयत्नादतिऋजुमतयस्तेन तोषं प्रयान्तु ॥

इह खलु केचन दधीचिगौतमशापदग्धतया बहुजन्मसु दुर्वासनावासितान्तःकरणा बहुजनैः स्वरसतः श्रुतिसंप्रतिपन्नतया बहुधा निरूपितमप्यद्वैतमरोचयन्तः स्वमतिमात्रपरिकल्पितसंकेते विशिष्टाद्वैते प्रमाणपथातीते श्रुत्यन्तानामपि तात्पर्यमिति परिकल्पयन्ति । तथाहितत्त्वमस्यादि वाक्यं न जीवब्रह्मणोः स्वरूपाभेदबोधनपरम् । अनादिप्रवृत्तविविधानन्तकर्माविद्यापटलपिहितविज्ञानादिगुणस्वभावस्य देवमनुष्यतिर्यगादिदेहोपाधिकसंसारस्यापवर्गायोग्यस्य नानाभूतस्य जीवस्य एष आत्मापहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्प इत्यादिश्रुतिभिस्तदनुसारिणीभिः

तेजोबलैश्वर्यमहावबोध-
सुवीर्यशक्त्यादिगुणैकराशिः ।
परः पराणां सकला न यत्र
क्लेशादयः सन्ति परावरेशे ॥

इत्यादिस्मृतिभिश्च निरस्तनिखिलदोषतया समस्तकल्याणगुणसागरतया चावगम्यमानब्रह्मस्वरूपाभेदायोगात् । किंतु विशिष्टाभेदपरं तदिति ।

End :

व्युत्पादितं च राजपुरुषादिसमासेषु अर्थवत्सूत्रस्थभाष्यवाक्यपदीयादिकमनुसृत्याखण्डार्थत्वं मञ्जूषायां वैयाकरणवर्यैः । अतः कोऽयमित्यादिप्रश्नोत्तरे राजपुरुष इत्यादावपि अराजकीयभिन्नपुरुषविशेषस्य स्वरूपतोऽभेदे सिद्धमखण्डार्थत्वम् । एतेन वाक्यस्याखण्डार्थत्वं यत्र कुत्रापि तन्त्रे न प्रसिद्धमिति तान्त्रिककीटशलाटुकीटवदुपेक्षणीयमिति व्यक्तम् । तस्मात् विशिष्टाद्वैतस्योक्तिसंभवाभावान्निरस्तसमस्तोपप्लवमखण्डानन्दैकरसं प्रत्यगभिन्नं ब्रह्मैव सकलवेदान्तप्रतिपाद्यमिति सिद्धम् ।

विशिष्टाद्वैतवादस्य मानाभावादयुक्तितः ।
स्वरूपाद्वैतवादो नः सम्यग्विजयतेतराम् ॥

Colophon :

इति श्रीमत्सर्वतन्त्राद्वैतविद्याचार्यपितृव्यमल्लेश्वरतन्त्रिविनीतब्रह्मदेवपण्डितविरचितविशिष्टाद्वैतदूषणसारसंग्रहः समाप्तः ।

1166 10. J. 25.

विशिष्टाद्वैतभञ्जनम्

Paper. × Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgrī script. New. Good. Good writing.

This also is the criticism on the doctrine of Vis'iṣṭādvaita-Vedānta as explained in the S'rībhāṣya of S'rī Rāmānuja. Incidently the author, whose name is not known, criticizes S'rī Rāmānuja's interpretation of certain Adhikaraṇas of Brahmasūtras. The title as Rāmānujas'ṛṅgabhaṅga is written in the top-lines of the pages.

Wants the beginning and end.

Beginning :

यत्र त्वस्य सर्वमात्मैवाभूदित्यत्र । तस्योक्तश्रुत्यैव विश्वमिथ्यात्वं च व्यवस्थापितम् । मिथ्यात्वे विश्वस्य श्रुतयोऽनन्ता: सन्ति । काम: संकल्प इत्यादि-श्रुतिभ्यश्च ज्ञानादीनामन्त:करणधर्मत्वात् तेषामेवा संसर्गाग्रहादात्मधर्मत्वव्यवहार: । असंसर्गाग्रहादेव नाह खल्वयमेवं संप्रत्यात्मानं जानातीति श्रुतिप्रसिद्धेश्च । न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यतेऽविनाशित्वात् । न तु द्वितीयमस्ति । नान्यदतोऽस्ति द्रष्टृ । अतो-ऽन्यदार्तम् । नान्त:प्रज्ञं न बहि:प्रज्ञं नोभयत:प्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम् । अदृश्यमव्यवहार्यम-ग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यम् । एकात्मप्रत्ययसारं प्रपञ्चोपशमं शिवमद्वैतं चतुर्थमित्यादिभ्य: संविदैक्ये-तरविरहयोरपि प्रमितत्वाच्च ।

End :

ब्रह्म विना चेतनाचेतनजगतो जीवं विना शरीरस्येव चक्षुषा पृथक्प्रत्ययात् । अन्यथा ब्रह्मतदनुविद्धत्वादि-संशयविपर्ययविरहप्रसङ्गात् । प्रभाज्योत्स्नारवीन्द्वादि-शब्दानां परस्परवाचकत्वप्रसङ्गात् । अवयवं विना-वयविन: पृथगुत्पादविरहवत् स्थितिप्रतीत्यादिविर-हेणावयविशब्दैरवयवप्रतीत्यापत्तेश्च । अवयविनं विना-वयवानां सद्भाव: शुक्लादिगुणादीन् विना गुणिन इवेत्यविशेष: । एवं संस्थानविशेषस्यैव गोत्वादि-जातित्वात् तं विना सं.

1167 30. I. 16.

विशिष्टाद्वैतभञ्जनम्

Palm-leaf. 46 Foll. 17 × 1¼ inches. 7 lines in a page. Telugu script. Old. Much injured. Illegible writing.

This is the original MS. from which the transcript described in the last number, was made.

Incomplete.

1168 20. H. 20.

वेदान्तकल्पलतिका—मधुसूदनसरस्वतीकृता

Palm-leaf. 28 Foll. 15¾ × 1 inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

This is one of the Prakaraṇa works on Advaita Vedānta specially dealing with the nature and characteristics of Mokṣa. The author attempts to refute the views of various philosophers on the subject and establish his own view. The author Madhusūdanasarasvatī was the pupil of Vis'ves'varasarasvatī and a contemporary of Gadādharabhaṭṭa, Tulasīdāsa and Nṛsiṁhās'rama in the latter half of the 16th century A.D. Among his other works the Advaitasiddhi and Siddhāntabindu deserve special mention. The work was printed and published in the Sarasvati Bhavana Texts Series, Benares, No. 3.

Complete.

Beginning :

मीमांसया कपटतो भुजगाम्बयेव
स्वाधीनतामुपनिषद्वनितेव नीत्वा ।
येनोद्धृतामृतफलेन गरुत्मतेव
तस्मै नमो भगवतेऽद्भुतशंकराय ॥
दुराप: शास्त्रार्थो नियतयतमानैरपि बुधै-
र्न संप्राप्तुं शक्यो मलिनमतिना यद्यपि मया ।
तथापि श्रीविश्वेश्वरचगणपङ्केरुहसुधा-
सुधाराभि: सिक्तो न कथमपि रिक्तोऽस्मि भविता ॥

सत्तर्कबोधनिकरै: परमात्मबोध-
निष्ठाफलेन दधसी परमां विभूतिम् ।
शारीरकार्थसुरशाखिगता सुधीभि-
र्वेदान्तकल्पलतिकेयमुपासनीया ॥
निर्धूय जैमिनिपतञ्जलिगौतमोक्ती:
काणादकापिलशिवादिमतानि चाहम् ।
श्रीव्यासशंकरसुरेश्वरसूत्रितार्थ-
बुद्धिं व्यनज्मि विशदं मितभाषितेन ॥
मुमुक्षूणामनुष्ठेयं विक्षेपविनिवृत्तये ।
मोक्षं ससाधनं वच्मि परपक्षनिरासत: ॥

अथ मोक्षे तत्साधने च विप्रतिपद्यन्ते विपश्चित: । तत्र लौकायतिकास्तावत् प्राकृतलोकानुसारिणो मनु-ष्यत्वादिविशिष्टभूतचतुष्टयसंघात एव चैतन्यं मन्य-माना नानागमपुराणानुमानादिसिद्धमपि देहादि-व्यतिरिक्तं चेतनं बन्धमोक्षभागिनमशुद्धबुद्धयो-ऽपलपन्ति नाप्रत्यक्षं प्रमाणमिति वदन्त: ।

End :

तत्सिद्धमात्मैवाविद्यानिवृत्त्युपलक्षितो मोक्ष: । तत्साधनं च वेदान्तवाक्यकरणकोऽन्यानुपरक्तब्रह्मा-त्मैक्यसाक्षात्कार एव श्रवणाद्यपनीतप्रतिबन्ध: सन्निति सर्वं समञ्जसम् ।

न्यायैर्निर्धूय दुष्टानिह कपिलकणादाक्षपादादिवादा-
नादायादुष्टमेकं श्रुतिमितममृतद्वारमद्वैतवादम् ।
वेदान्तैकप्रमेयं परमसुखमयं ज्ञानमज्ञानशून्यं
मोक्षं व्याचक्षते यं कमपि सुकृतिन: सोऽहमेवास्मि पूर्ण: ॥

Colophon :

इति श्रीवेदान्तकल्पलतिकायां परमहंसपरिव्राजक-मधुसूदनसरस्वतीकृतायां ससाधनापवर्गनिरूपणं नाम प्रथम: स्तबक: ।

1169 20. H. 27.

वेदान्तडिण्डिम:

Palm-leaf. 8 Foll. 9 × 1 inches. 5 lines in a page. Telugu script. Old Injured. Good writing.

This is a metrical Prakaraṇa work explaining the principles of Advaita Vedanta. The work is called Vedānta-ḍiṇḍima because each stanza has its fourth pāda as इति वेदान्तडिण्डिम: . The author's name is not known.

Complete.

Beginning :

वेदान्तडिण्डिमास्तत्त्वमेकमुद्घोषयन्ति यत् ।
आस्तां पुरस्तात्तत्तेजो दक्षिणामूर्तिशब्दितम् ॥ १ ॥
आत्मानात्मपदार्थौ द्वौ भोक्तृभोग्यत्वलक्षणौ ।
ब्रह्मैवात्मा न देहादिरिति वेदान्तडिण्डिम: ॥ २ ॥
ज्ञानाज्ञानपदार्थौ द्वावात्मनो बन्धमुक्तिदौ ।
ज्ञानान्मुक्तिर्निबन्धोऽन्यादिति वेदान्तडिण्डिम: ॥३॥

End :

अहोऽस्माकमलं मोहादात्मा ब्रह्मेति निर्भयम् ।
श्रुतिभेरीरवोऽद्यापि श्रूयते श्रुतिरञ्जन: ॥ ७७ ॥
वेदान्तभेरीभांकार: प्रतिवादिभयंकर: ।
श्रूयतां ब्राह्मणै: श्रीमद्दक्षिणामूर्त्यनुग्रहात ॥ ९७ ॥

Colophon :

वेदान्तडिण्डिमग्रन्थ: संपूर्ण: ।

1170 20. H. 25.

वेदान्तडिण्डिम:

Palm-leaf. 9 Foll. 12 × 1 inches. 4 lines in a page. Telugu script. Old. Much injured. Illegible writing.

Wants beginning ; otherwise complete.

1171 22. D. 88.

वेदान्तडिण्डिमः

Palm-leaf. 6 Foll. 17 × 1 inches. 4 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

Adds the following verses at the end :

नाभिकमलमध्ये ज्योतिरानन्दरूपं
हृदयकमलमध्ये सूर्यबिम्बानुरूपम् ।
भ्रुवयुगलमध्ये हंसमार्गानुरूपं
दशशतदलमध्ये ब्रह्ममार्गानुरूपम् ॥
सकलमिदमयं स्यात्स्थूलसूक्ष्मानुरूपं
विभु परमरूपं पातु मां नारसिंहम् ।

1172 33. C. 24.

वेदान्तडिण्डिमः

Palm-leaf. 5 Foll. $15 \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good and small writing.

Complete.

1173 20. H. 31.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 16 Fol. $18\frac{3}{4} \times 1$ inches. 15 lines in a page. Telugu script. Old. Injured. Good writing.

Wooden boards are added to both sides.

This is the famous Prakaraṇa work on Advaita Vedānta. The author Dharmarājādhvarīndra was the grand pupil of the famous Nṛsiṁhās'rama and pupil of Veṅkaṭanātha of Velāṅguḍi village in Tanjore Dt. He was the author of the following other works: Tarkacūḍāmaṇi, Pañcapadikāvyākhyā Padayojanā, Nyāyasiddhāntadīpa vyākhyā and Yuktisaṁgraha. He was the younger brother of Trivedi Nārāyaṇādhvarin and a native of the village Kaṇḍramāṇikkam in Tanjore Dt. (Vide D. No. 6217, Tanjore). He belonged to the Ṛgveda and the Kauṇḍinyagotra. He must have flourished in the 17th century A.D. The work is also called Advaitaparibhāṣā. It is divided into 8 Paricchedas as given below:

१. प्रत्यक्षपरिच्छेदः	५. अर्थापत्तिपरिच्छेदः
२. अनुमानपरिच्छेदः	६. अनुपलब्धिपरिच्छेदः
३. उपमानपरिच्छेदः	७. विषयपरिच्छेदः
४. आगमपरिच्छेदः	८. प्रयोजनपरिच्छेदः.

The work has the following four commentaries so far as known—1. Vedāntas'ikhāmaṇi by Rāmakṛṣṇādhvarin, Printed. 2. Prakās'ikā by Pettādīkṣita, Printed. 3. Tattvabodhinī by Vedādrisūri (No. 357, Vol. III, Curator's Office Library, Trivandrum.) 4. Bhūṣaṇa by Nārāyaṇabhaṭṭa of Guṇḍu family (R. No. 1463, Madras).

Complete.

Beginning:

यदविद्याविलासेन भूतभौतिकसृष्टयः ।
तं नौमि परमात्मानं सच्चिदानन्दविग्रहम् ॥
यदन्तेवासिपञ्चास्यैर्निरस्ता भेदिवारणाः ।
तं नौमि नरसिंहाख्यं यतीन्द्रं परमं गुरुम् ॥
श्रीमद्वेंकटनाथाख्यान् वेलांकुटिनिवासिनः ।

जगद्गुरूनहं वन्दे सर्वतन्त्रप्रवर्तकान् ॥
येन चिन्तामणौ टीका दशटीकाविभञ्जनी ।
तर्कचूडामणिर्नाम कृता विद्वन्मनोरमा ॥
टीका शशधरस्यापि बालव्युत्पत्तिदायिनी ।
पदयोजनया पञ्चपादिका व्याकृता तथा ॥
तेन बोधाय मन्दानां वेदान्तार्थावलम्बिनी ।
धर्मराजाध्वरीन्द्रेण परिभाषा वितन्यते ॥

इह खलु धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु मोक्ष एव परमपुरुषार्थः । न च पुनरावर्तत इत्यादिश्रुत्या तस्य नित्यत्वावगमात् । इतरेषां त्रयाणां प्रत्यक्षेण, तद्यथेह कर्मचितो लोकः क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते इत्यादिश्रुत्या चानित्यत्वावगमात् ।

End:

तदुक्तमाचार्यवाचस्पतिमिश्रैः—

उपासनादिसंसिद्धितोषितेश्वरचोदितम् ।
अधिकारं समाप्यैते प्रविशन्ति परं पदम् ॥

इति । एतच्चैकमुक्तौ सर्वमुक्तिरिति पक्षे नोपपद्यते । तस्मादेकाविद्यापक्षेऽपि प्रतिजीवमावरणभेदोपगमेन व्यवस्थोपपादनीया । तदेवं ब्रह्मज्ञानान्मोक्षः । मोक्षश्चानर्थनिवृत्तिः निरतिशयब्रह्मानन्दावाप्तिश्चेति सिद्धं प्रयोजनम् ।

Colophon :

इति धर्मराजाध्वरीन्द्रविरचितायां वेदान्तपरिभाषायामष्टमः परिच्छेदः । समाप्ता परिभाषा ।

1174 20. H. 32.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 54 Foll. $8 \times 1\frac{3}{4}$ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

The fly-leaf gives the former owner's name as Balakrishna Sastri.

Complete.

1175 20. H. 33.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 29 Foll. $16 \times 1\frac{1}{4}$ inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the last chapter.

1176 22. D. 86.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 4 Foll. $13\frac{1}{2} \times 1\frac{1}{4}$ inches. 11 lines in a page. Grantha script. Old. Much injured. Good writing.

Contains a very small portion of the 1st chapter.

1177 22. M. 10.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 36 Foll. $15\frac{1}{2} \times 1\frac{1}{8}$ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the last chapter.

1178 23. A. 35.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 34 Foll. 15 × 1 inches. 8 lines in a page. Grantha script. Old. Injured. Good writing.

Breaks off in the last chapter.

One extra leaf added at the end reads the following verses:

बिल्वेशो जयति श्रुतैकविदितः संदर्शनान्मामकं
पापं दूरतरं जगाम सुगुरौ भक्तिर्दृढैधिष्यते ।
आगन्ता निखिलापि सिद्धिरनघा लोकः सुखं तिष्ठता-
च्चिन्तागच्छदथो सुखं त्विदमभूदात्माभविष्यत्ततः ॥
स्वात्मानन्दस्वरूपाय संयतेन्द्रियवृत्तये ।
स्वाधिष्ठितप्रपञ्चाय सात्कृतोऽहं हनूमते ॥

1179 26. A. 12.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 20 Fol. 16 × 1¼ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

The former owner of the MS.—Āsūri S'aṭhakopācārya.

1180 26. M. 7.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 34 Foll. 15½ × 1¼ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete.

1181 27. O. 11.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 21 Foll. 15 × 1¼ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

Complete.

The owner's name—Āccādīkṣita.

1182 29. A. 9.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 37 Foll. 15½ × 1⅜ inches. 7 lines in a page. Telugu script. Old. Injured. Good writing.

Complete.

Date of copying: 3rd day of the bright-fortnight of the Māgha month in the year Viṣu.

The former owner of the MS.—Veṅkayya.

1183 30. I. 18.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 7 Foll. 18 × 1¼ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Incomplete.

1184 33. B. 11.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 60 Foll. 12 × 1¼ inches. 4 lines in a page. Oriya script. Old. Fair. Good writing.

Wooden boards are added to both sides.

Complete.

1185 33. M. 7.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 31 Foll. 20 × 1½ inches.

9 lines in a page. Grantha script. Old, Injured. Good writing.

Complete.

One extra leaf added in the beginning contains a few lines of the Āgamaparic-cheda of the work in duplicate.

1186 34. N. 19.

वेदान्तपरिभाषा—धर्मराजाध्वरीन्द्रकृता

Palm-leaf. 68 Foll. 11½ × 1¼ inches. 6 lines in a page. Grantha script. Old. Injured. Good writing.

Complete.

One extra leaf added in the beginning contains the verses of S'āntipāṭha to be recited before commencing the reading of Vedānta works.

1187 27. O. 11.

वेदान्तपरिभाषाव्याख्या वेदान्तशिखामणिः—रामकृष्णाध्वरिकृत:

Palm-leaf. 76 Foll. 15 × 1¼ inches. 12 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides.

This is a commentary on Dharmarājā-dhvarīndra's Vedāntaparibhāṣā by his son and pupil Rāmakṛṣṇādhvarin. He must have flourished in the beginning of the 18th century A.D. The Commentary is called Vedāntas'ikhāmaṇi. There are two editions of the commentary printed and published in Telugu character by Dharmādhikāri Chakravartiayyangar, Mysore, and in Devanāgari character by the S'rī Venkatesvara Press, Bombay.

Complete.

Beginning:

ज्ञानानन्दमयं देवं निर्मलस्फटिकाकृतिम् ।
आधारं सर्वविद्यानां हयग्रीवमुपास्महे ॥
नैदाघभानुकिरणेष्विव वारिपूरः
सर्वो विभाति यदबोधवशात्प्रपञ्चः ।
मालाफणीव च निमीलति यत्प्रबोधात्
तद्ब्रह्म नौमि सुखमद्वयमात्मरूपम् ॥
आसेतोरासुमेरोरपि भुवि विदितान्धर्मराजाध्वरीन्द्रान्
वन्देऽहं तर्कचूडामणिमणिजननक्षीरधींस्तातपादान् ।
यत्कारुण्यान्मयाभूदधिगतमधिकं दुर्ग्रहं सूक्ष्मधीकै-
रप्यात्तं शास्त्रजातं जगति मखकृता रामकृष्णाह्वयेन ॥
वेदान्तपरिभाषाख्यां सोऽहं तातविनिर्मिताम् ।
व्याकरोमि कृतिं सर्वश्रुत्यन्तार्थप्रकाशिकाम् ॥
मत्कृतिं च प्रबन्धं च न प्रशंसन्ति पण्डिताः ।
तथापि बुद्धिवैशद्यफलोऽयं मत्परिश्रमः ॥

प्रेक्षावत्प्रवृत्त्यर्थं विषयप्रयोजने निर्दिशन् निर्विघ्नपरिसमाप्तये मङ्गलमाचरितं शिष्यशिक्षायै ग्रन्थतो निबध्नाति—यदविद्येति । तं परमात्मानं नौमीति संबन्धः । जीवाभिन्नं ब्रह्म शास्त्रप्रमेयमिति सूचयितुमात्मशब्दः । नन्वेवं तस्यैव तमेव प्रत्युत्कर्षापकर्षाभावेन नमस्कर्तृनमस्कार्यतानुपपत्तिरित्याशङ्क्य कल्पितभेदमादायाविद्याप्रतिबिम्बं कर्तृत्वादिविशिष्टमपकृष्टरूपं नमस्कर्तृ, तद्द्वयावृत्तं सर्वज्ञत्वादिविशिष्टमुत्कृष्टरूपं नमस्कार्यमित्यभिप्रेत्याह—परमिति ।

End:

नन्वेकाविद्यागतनानाशक्त्यभ्युपगन्तृमतेऽप्येकमुक्तौ सर्वमुक्तिरेव । इयमावरणशक्तिर्निवर्त्या, नेयमित्यत्र नियामकाभावेन ब्रह्मसाक्षात्कारात् सर्वावरणशक्तिविशिष्टाविद्याविनाशावश्यंभावादित्याशङ्क्य यथा शुक्तिसाक्षात्कारात्फलबलेनैकावरणशक्तिनाशः, यथा सर्वज्ञानप्रागभावनिवृत्तिस्वरूपयोग्येन ज्ञानेन कस्य-

च्चिदेव प्रागभावस्य निवृत्तिः, एवमन्यस्य प्रपञ्चो-
पलम्भानुरोधेन यस्य ब्रह्मज्ञानं तदीयानर्थहेत्वावरण-
शक्तेरेव नाशः, नान्यदीयसंसारहेत्वावरणशक्ती-
नामिति व्यवस्थोपपद्यत इत्याह — तस्मादिति ।
परिच्छेदप्रतिपाद्यमर्थं निगमयति—तदेवमिति ।

प्रमादलिखितं त्यक्तं प्रमादालस्यदोषतः ।
तत्क्षन्तव्यं बुधैः सद्भिः क्षमा हि विदुषां धनम् ॥
सुवर्णखचिताकारा कृतिरेषा मया कृता ।
विदुषामस्तु वेदान्तशिखामणिरलंक्रिया ॥
अनेन मत्प्रबन्धेन वेदान्तार्थावलम्बिना ।
गुरुकारुण्यलब्धेन तारकं ब्रह्म तुष्यतु ॥
वन्देऽहं वन्दनीयानां वन्द्यां वाचामधीश्वरीम् ।
कामिताशेषकल्याणकलनाकल्पवल्लरीम् ।

Colophon :

इति श्रीधर्मराजाध्वरीन्द्रात्मजरामकृष्णाध्वरिविर-
चिते वेदान्तशिखामणौ अष्टमः परिच्छेदः ।

1188 20. H. 31.

वेदान्तपरिभाषाव्याख्या वेदान्तशिखामणिः—
रामकृष्णाध्वरिकृतः

Palm-leaf. 23 Foll. $18\frac{3}{4} \times 2$ inches. 15 lines in a page. Telugu script. Old. Injured. Good writing.

Wooden boards are added to both sides. Incomplete.

1189 22. L. 38.

वेदान्तपरिभाषाव्याख्या वेदान्तशिखामणिः—
रामकृष्णाध्वरिकृतः

Palm-leaf. 26 Foll. $18\frac{1}{2} \times 1\frac{1}{4}$ inches. 7 lines in a page. Grantha script. Old. Injured. Good writing.

Incomplete.

One extra leaf added in the beginning contains a small list of books owned by the owner of this MS.

Date of copying : Sādhāraṇa year.

1190 25. A. 53.

वेदान्तपरिभाषाव्याख्या वेदान्तशिखामणिः—
रामकृष्णाध्वरिकृतः

Palm-leaf. 45 Foll. $17\frac{1}{2} \times 2$ inches. 14 lines in a page. Grantha script. Old. Injured. Good writing.

Incomplete.

1191 26. M. 7.

वेदान्तपरिभाषाव्याख्या वेदान्तशिखामणिः—
रामकृष्णाध्वरिकृतः

Palm-leaf. 146 Foll. $15\frac{1}{2} \times 1\frac{1}{4}$ inches. 9 lines in a page. Grantha script. Old. Injured. Good writing.

Wooden boards are added to both sides. Complete.

1192 38. C. 14.

वेदान्तपरिभाषाव्याख्या प्रकाशिका—पेत्ता-
दीक्षितकृता

Paper. 80 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 15 lines in a page. Devanāgarī script. New. Good. Good writing.

This is another commentary on the Vedāntaparibhāṣā of Dharmarājādhvarīndra. The commentary is called Prakāśikā.

The author Peṭṭādīkṣita (or Peddadīkṣita in Telugu) is known to have written the other work called Tattvacintāmaṇiprakāśasāra (R. No. 3947*b* Madras) wherein he mentions himself as the son of Dharmarājādhvarīndra's brother whose name is mentioned as Trivedi Nārāyaṇādhvarin in Tarkacūḍāmaṇi (Vide No. D. 6217 Tanjore). He must have lived about the beginning of the 18th century A.D. This Peṭṭādīkṣita of Kauṇḍinyagotra should not be confounded with another Paṭṭādīkṣita, the author of the Chandovicitivṛtti, who belonged to Kauśikagotra. The work was printed and published in the Trivandrum Sanskrit Series No. 93.

Incomplete.

Beginning :

ज्ञानं विशुद्धं परमात्मभूतं स्वयंप्रकाशं जगदेकहेतुम् ।
आनन्दरूपं परमं परेशं वेदान्तवेद्यं तमहं प्रपद्ये ॥
यत्प्रसादप्लवेनैव शास्त्राब्धिमतरं सुखम् ।
तं धर्मराजाध्वरिणं वन्दे सर्वार्थसिद्धये ॥
पेत्तादीक्षितवर्येण परिभाषाप्रकाशिका ।
क्रियते विदुषां प्रीत्यै बालानां मतिदायिनी ॥

अत्र प्रेक्षावत्प्रवृत्त्यर्थं विषयप्रयोजने प्रदर्शयन् निर्विघ्नपरिसमाप्तये इष्टदेवतां नमस्करोति—यद्-विद्येति । यस्याविद्या यदविद्या । अत्र षष्ठ्यर्थस्तु विवरणाचार्यमते आश्रयाश्रयिभावः । आचार्यवाचस्पतिमते विषयविषयिभावः । अविद्या नाम भावरूपा ज्ञानम् ।

End :

ननु सोऽयमादिपदानां शक्त्या स्वार्थप्रतिपाद-
कत्वमस्तु । न लक्षणया । मुख्यार्थे संभवत्यमुख्यार्थ-
कल्पनाया अन्याय्यत्वादित्याशङ्क्य मुख्यार्थासंभ-
वात् तत्कल्पनमित्याह—अत्र हीति । सोऽयं देवदत्त
इत्यत्र तद्देशतत्कालविशिष्टस्य.

Fol. 75*b* reads the following colophon :

इति श्रीमत्त्रिवेदिनारायणदीक्षितात्मजेन पेत्ता-
दीक्षितवर्येण विरचितायां वेदान्तपरिभाषाप्रकाशि-
कायामनुमानपरिच्छेदः संपूर्णः ।

1193 23. C. 3.

वेदान्तपरिभाषाव्याख्या प्रकाशिका—पेत्ता-
दीक्षितकृता

Palm-leaf. 84 Foll. $13 \times 1\frac{1}{2}$ inches. 6 lines in a page. Telugu script. Old. Injured. Good writing.

Incomplete.

1194 8. I. 20.

वेदान्तभूषणम्

Paper. 31 Foll. $8\frac{1}{4} \times 6\frac{1}{2}$ inches. 14 lines in a page. Devanāgarī script. New. Good. Good writing.

A treatise on Advaita Vedānta. The author's name is not known. The work has been quoted in the Vedāntatattvasāra by Vidyendrasarasvatī (D. No. 7575, Tanjore). As the author salutes the deity worshipped at Tiruvayyar in Tanjore Dt. he may be supposed to have been a native of that place.

Incomplete.

Beginning :

यः स्वाज्ञानाद्विश्वयोनिस्तदीयः
सत्यज्ञानानन्दनिर्भेदरूपः ।
यस्मिंस्त्रय्यन्तः प्रमाणं समस्तं
तं प्रत्यञ्चं श्रीनृसिंहं नमामः ॥

आमीलिताक्षममलेन्दुकलावतंस-
मात्ताक्षसूत्रवटपुस्तकबोधमुद्रम् ।
आवीतमादिमुनिभिर्विनयावनम्रै
रुद्रं वटद्रुतलवासि महः प्रपद्ये ॥
नमः पञ्चनदेशाय संचितार्धाम्बिकात्मने ।
वञ्चिताखिलमोहाय प्रपञ्चोत्पत्तिहेतवे ॥
विधिना श्रुतवेदान्तः श्रुतसर्वमतान्तरः ।
नत्वाहं गुरुविघ्नेशान् कुर्वे वेदान्तभूषणम् ॥

ननु कथं श्रवणविधिः ? श्रोतव्य इत्यादौ तव्यप्रत्ययस्य अर्हाद्यर्थतया तरति शोकमात्मवित् इति प्रकरणस्यात्मनः स्तावकत्वेनैकवाक्यत्वसंभवे वाक्यभेदेन विधिपरत्वस्यान्याय्यत्वात् । अन्यथा विष्णुरुपांशु यष्टव्य इत्यादावपि विधित्वमापद्येत ।

End :

नापि स्वाध्यायोऽध्येतव्य इतिवन्नियमविधिः; मुक्तिसाधननिर्विशेषब्रह्मज्ञानस्य वाक्यप्रमाणमात्रजन्यत्वेनाध्ययननियमादृष्टजन्यत्वपूर्ववदिह नियमादृष्टजन्यस्य कस्यचिदभावात् । अक्षरावाप्तौ लिखितपाठादिवत् इह नियमव्यावर्त्यस्य पाक्षिकसाधनान्तरस्याप्राप्तत्वात् । विद्या . .

1195 9. F. 22.

वेदान्तसंज्ञाप्रकरणम्

Paper. 23 Foll. $8\frac{1}{2} \times 6\frac{1}{4}$ inches. 25 lines in a page. Telugu script. Old. injured. Good writing.

This is a short Prakaraṇa work explaining the meaning of the technical terms used in the works on Advaita Vedānta. The author's name is not known.

Complete.

Beginning :

श्रीमद्गुरोः पादयुगं नत्वा तस्य प्रसादतः ।
वेदान्तसंज्ञाः प्रत्येकं निरूप्यन्ते यथामति ॥

